पृच्छकः स्वशरीरस्य स्पृष्ट्वा भालं विनिर्दिशेत् ।
हिरण्यं धनधान्यं च प्राप्यते नात्र संशयः ।। २ ।।

End :

हस्ते चोत्तरफाल्गुन्यां द्वितीयादशमीषु च ।
भौमार्कबुधवारेण उत्तरे गमनं नहि ।। २० ।।

Colophon : Nil

Serial No. 15

Aristajātakaphala Anon. (MS. No. 74051- e)

Beginning :

पापदा देशकालस्थाः क्षीणचन्द्रस्य पञ्चमे ।
जातस्य भार्या खण्ड्या स्यादिति ज्योतिर्विदो विदुः ।।
पञ्चकामस्थ यो भौमः हतार्कः पापदृष्टयोः
अण्डवृद्धिं विजानीयात् जातस्यैव न संशयः ।।

End:

लग्ने लग्ने द्विनिध्येव सप्तमे अष्टमस्तथा ।
भानुभौमार्कजौ सिद्धा आत्महानिर्न संशयः ।।
द्वादशे रविमन्दा च क्षीणचन्द्रस्तथैव च ।
पितुर्मरणमाप्रोक्ता न केन्द्रे देवपूजिते ।।

Colophon :

अरिष्टजातकफलं संपूर्णम् ।।

Serial No. 28

Aṣṭakavargaphala, Anon. (MS. No. 74051 - c)

Beginning :

राशिचक्रे यथामार्गं निक्षिप्य च गृहस्य च ।
त्रिकोणशोधनं कुर्यात् पश्चादौ(त् ?) सर्वेषु योजयेत् ।।
त्रिकोणस्य फलं प्रोक्तं मेषसिंहधनुः क्रमात् ।
कन्या मृगास्ये तु यमा (?) तौलिघटेषु च ।।
कर्किवृश्चिकमीनास्ते त्रिकोणाख्यं परस्परम् ।
त्रिकोणेषु च यन्यूनं तत्तुल्यं त्रिषु शोधनम् ।।

End :

राजकोपान्मनुष्याणां नेत्रादि अङ्गहीनवान् ।

कारागृहप्रवेशः स्याद्राजदण्डभयाधिकम् ।।
मासोऽल्पमूनमाप्नोति नीचक्षेत्रे गते कुजे ।
मन्दे यावत् फलं सन्ति(?) तनुर्षे रोगभीतिकृत्
सम्मानजनहानिश्च देशान्तरगतेऽपि वा ।।

Colophon :

मन्दाष्टकवर्गफलं समाप्तम् ।।

Post colophon :

हरिः ओम् ।।

Serial No. 31

Aṣṭakavargavākyāni, Anon. (MS. No. 77559-j)

Beginning :

अष्टवर्गस्य वाक्यानि सूर्यादीनां यथाक्रमम् ।
ग्रहेत् प्रभृति स्वथानात् निर्दिशेदक्षरैः क्रमात् ।।
राशिचक्रं लिखेद् भूमौ संयोज्याक्षरसंख्यया ।
आद्यक्षरेण दशमं निर्दिशेद् विधिवत्ततः ।।
सूर्यादिलग्नपर्यन्तं एकैर्वाक्यैर्विनिक्षिपेत् ।
स्वेषु स्वेष्वष्टवत्तेषु ग्रहाणां च पृथक् (पृथक्) ।।
दशद्वादशपर्यन्तं संभिन्नं योजयेत् ततः ।
ग्रहादीनां फलं ज्ञात्वा निर्दिशेच्च पृथक् (पृथक्) ।।
दशायामाद्यभागेषु शत्रुनीचग्रहेष्वपि ।
व्याध्यर्थदुःखनाशादीन् लभते नात्र संशयः ।।
एकद्वित्रफले यस्मिन् धनधान्यपशुक्षयः ।
चत्वारि मध्यमानि स्युर्दशा तत्रैव मध्यमा ।।
पञ्चमादिर्गणेऽधीत्य अष्टमं सर्वसिद्धिदम् ।
क्षेत्रोचोपचयस्थाने फलमेवमुदाहृतम् ।।
पूर्वोक्तमार्गे शुभदमष्टवर्गं शुभं यदि ।

शुभादिद्विगुणं दद्युः अन्यथा वान्यथा भवेत् ।।
एवं द्वादशमूर्त्यादि स्वे स्वे स्थाने दशाफलम् ।

अथ वाक्यानि रवेः -

रपुमवसो तं तानेयं च गोप्ता नये ।

End :

देवो भवोऽधिगो भामा तमो रामो धिगः क्रमात् ।
आदिबीजप्रसंख्याः स्युः रव्यादीनां यथाक्रमम् ।।

Serial No. 36

Āyādilakṣaṇa (Ms. no. TR 475-b)

Beginning :

आयं प्रपञ्चो योनिश्च वंशं शक्तिर्धीस्ततः ।
पक्षो वारः ऋक्षराशी स्वरायुर्भूतपञ्चकः ।
वर्गपञ्चगणं चाग्निरायादिः षोडशस्ततः ।।

आयं, व्ययं, योनिः, वंशं, अंशः, तिथिः, पक्षः, वारं, ऋक्षं, राशि, स्वरं, आयुः, पञ्चभूतं, वर्गपञ्चकं, गणं, अग्निः इवु १६ विधम् ।

इतिल् आयमावतु -

वसुभानुस्तथायामं नन्दनाडी व्ययं भवेत् ।
गुणनागं योनिः स्यात् नावधिर्वंशमेव च ।।

End :

आयादीनां फलं हीनं शुभदं सर्वसंग्रहे ।
अशुभे अशुभं विद्यात् तद्दोषे दुःखभाजनम् ।।
तस्मात् सर्वप्रयत्नेन शुभमानं सुयोजयेत् ।
गुणाधिक्यं तु चिद्योगे किंचिदल्पं न दोषकम् ।।
लिङ्गं वा प्रतिमां वापि मासनक्षत्रकं यदि ।
तद्द्रव्यारम्भणं वाथ शूलस्थापनकं तु वा ।।

तद्दिने तत्प्रतिष्ठां वा कारयेत्तु विचक्षणैः ।
सजीवं सद्यसांनिध्यमाचन्द्रतारवत् सुखम् ।।

Colophon : Nil

Post-colophon :

हरिः ओम् । राजगोपालस्वामिने नमः ।।

Serial No. 52

Upendracakram, Anon. (MS. No. 70817 - c)

Beginning :

मथुरापुरिविघ्नेशं महाभूतिप्रदायकम् ।
मम विज्ञानसिद्ध्यर्थं वन्देऽहं पार्वतीसुतम् ।।

आदित्यचन्द्रकुजसौम्यगुरुस्सितार्कि-
राहुः ध्वजः परिधिधूमशचीपतिं तु ।
चापोलकब्रह्महरिशंकरगौरीविघ्न-
राजं नमामि मम सर्वसुखाप्तिहेतोः ।।

कडौवाचा-

उपेन्द्रचक्रं लोकानां सूर्यवच्चक्षुरूपिणम् ।
घटिकादिनमासादिसंवत्सरदशासु च ।।

. .कमार्गेण जन्तूनां नानाकालफलोद्भवम् ।
शास्त्रं वक्ष्ये सुराणां च पूजितं विष्णुनिर्मितम् ।
प्रादक्षिण्यगुणास्सूर्यचन्द्रभौमज्ञवाक्पतिः ।।

End :

रहपरिमाणं मेषमिराज्यमारम् ।

Colophon :

इति ओम् । इत्युपेन्द्रचक्रं संपूर्णम् ।

Serial No. 58

Ekodaraviṣaya, Anon. (MS. No. PM. 1313 -r)

Begnning :

अथ एकोदरं आह-

नैकसंवत्सरं कुर्याद् भ्रात्रोर्जमलजातयोः ।
विवाहव्रतचूडं च तथा व्रतविसर्जनम् ।। १ ।।

एकोदरस्वजातानां वत्सरे नरयोषिताम् ।
न जातु मङ्गलं कुर्यात् मातृभेदे विधीयते ।। २ ।।

एकोदरभ्रातृविवाहकृत्ये स्वसुर्न पाणिग्रहणं विधेयम् ।
षण्मासमध्ये रु(ऋ)षयः समुक्त (?) न मुण्डनं मुण्डनतो विधेयम् ।। ३ ।।

नारदसंहितायाम् -

पुत्रोद्वाहात् परं पुत्री विवाहं न तु कारयेत् ।
न तयोर्व्रतमाङ्गल्यं मङ्गले चेत्त्वमङ्गलम् ।। ४ ।।
ऊर्ध्वं विवाहात् शुभदो नरस्य नारीविवाहात् नर तु (?) त्रयेण ।
नारीविवाहात्तदहेऽपि कार्यं नरस्य पाणिग्रहणं मुनीन्द्राः ।। ५ ।।

End :

तथा ज्योतिस्सारे -

अतिचारगते जीवे न राशिं न त्यजेद् यदि ।
लुप्तसंवत्सरं नाम समकर्म बहिः कृतम् ।।

टोडरानन्दे -

एकोदरसमुत्पन्नौ भगिनी वाथ पुत्रकौ ।
पृथग् वेद्यां तयोः कुर्याद् विवाहः शुभदः स्मृतः ।। १ ।।

एकोदरसमुत्पन्नौ युगलौ भ्रातरौ तयोः ।
मौञ्जीचूडादिकं कर्म दिनैकेनैव दुष्यति ।।

Colophon :

इति सहोदरविषये ।

Serial No. 61

Karaṇakutūhala by Bhāskara with Anonimous Comm. Udāharaṇa, (MS. No. PM 1310)

Preliminary :

श्री गणेशाय नमः । श्री गुरुभ्यो नमः ।
श्रीकेशवाय जिता ऋताथि (?)। ग्रह ।।
. . . . ब्रह्मतुल्यप्रारम्भः ।।

Beginning of Text :

गणेशं गिरं पद्मजन्माच्युतेशान्
ग्रहान् भास्करो भास्करादींश्च नत्वा ।
लघुप्रक्रियं प्रस्फुटं खेटकर्म
प्रवक्ष्याम्यथ ब्रह्मसिद्धान्ततुल्यम् ।।

Beginning of Comm. :

प्रणम्य विघ्नहर्तारं मन्दबोधाय सांप्रतम् ।
ब्रह्मतुल्यस्य गणितोदाहृतिं प्रकरोम्यहम् ।। १ ।।

श्री भास्कराचार्यो निर्विघ्नग्रन्थसमाप्त्यर्थं गणेशादीन् नमस्कृत्य चिकीर्षितं प्रतिजानीते (? जानाति) - गणेशं इति ।

End :

Folio broken to pieces and crumbling.

Serial No. 65

Karaṇapaddhatikriyā, Anon. (MS. No. 75323- b)

Beginning :

रव्यादीनां गुणकारहारकाणां द्वितीयहारकाणां च आनयनमाह्रियते । तत्र रवेः -

युगहरणेन युगभूदिनम् । 'राश्योरन्योन्यहरण' इत्यादि प्रकरणकुट्टाकारक्रमेण अन्योन्यहरणाज्जाता वल्ली ३१५। ३।१।६।२।६।२। । इमां वल्लीं करणपद्धत्या द्वितीयाध्याये षष्ठश्लोकः ।

End :

भूदिनं राहोर्हारकेण 'शुद्धाक' अनेन हत्वा आप्तफलं राहोर्द्वितीयहारकः ८१३ गोष्पदम् ।
कोलम्बे भंगुरयुते फसलीति प्रकीर्तिता ।
सा चे 'ऋळेश' संयुक्ता किरिस्वर्षं भवेद् ध्रुवम् ।।
एकेन संयुतः तच्च चापाष्टादशतः परम् ।
तदेव वर्षं भवति लौकिकव्यवहारतः ।।

Colophon : Nil

Serial No. 66

Kākapiṅgalalakṣaṇa, Anon. (MS. No. 66342-b)

Beginning :

काकस्य वचनं श्रुत्वा पादच्छायां तु कारयेत् ।
त्रयोदशपदं गत्वा धभिर्जोगं ? समाहरेत् ।।
लाभं खेदं तथा सौख्यं भोजनं च धनागमः ।
मरणं सर्वकार्येषु पराशरवचोदितम् ।।

अथ पिङ्गलशब्दज्ञानम् -

End :

धनुर्लग्ने पुत्रलाभो मकरे कन्यका भवेत् ।
कुम्भे अथ भयं घोरं मीने मित्रस्य दर्शनम् ।
अनेनैव प्रकारेण पिङ्गलस्य निरीक्षणम् ।।

Colophon :

इति काकपिङ्गललक्षणं संपूर्णम् ।

Post Colophon :

हरिः ओम् । गुरुभ्यो नमः । श्री वरसिद्धिमहागणपतये नमः । श्री रामजयम् । श्री रामजयम्।

Serial No. 73

Kālaguṇadīpikā by Śrīnivāsācārya (MS. No. 69798-a)

Preliminary :

शुभमस्तु ।

Beginning :

प्रभवाब्दे मिता वृष्टिः मितसस्या च मेदिनी ।
भवेद् दुर्मरणं भूयः अक्षीराः पशुजातयः ।। १ ।।
अरण्येषु . . .ष्टि तस्मिन् संवत्सरे गृहे ।
लवणैरण्डकार्पासानर्जयेत् समये वरम् ।। २ ।।

End :

एवं संवत्सरफलं वत्सरादौ द्विजोदितम् ।
यः शृणोति सविस्रम्भः तस्यायुरभिवर्धते ।।

Colophon: Nil

Serial No. 76

Kālacakrajātaka by Mārtāṇḍabhairava (MS. No. 72123)

Preliminary :

श्रीगुरुभ्यो नमः । गणाधिपतये नमः । वेङ्केटेश्वराय नमः ।

Beginning :

प्रणम्य लोककर्तारं शिवं परमकारकम् ।
. . चरि(?) चक्रमध्यस्थं चतुष्षष्टिकलात्मकम् ।।
क्रीडते भगवान् यत्र आरोन्वारोपवानिव ।
तं दृष्ट्वा दिव्ययोगीन्द्रा प्रणिपत्य पराम्बिकाम् ।।

देव्युवाच -

अनादिनिधनं गुह्यं करुणोच्चारवर्जितम् ।
पाकं पर्यागतं दिव्यमतिगुह्यं तु निर्मलम् ।।
ग्रहाणां च विचारेण तत्कालं कालर्निणयम् ।
कालचक्रक्रमं चैव परमायुविनिर्णयम् ।।
विश्वोत्पत्तिविधिं चैवमाधानादिविधिं क्रमात् ।
ग्रहयोगफलं चैव राजयोगं तथैव च ।।
रश्मीनां लक्षणं चैव सर्वयोगफलं तथा ।
नष्टजातकविज्ञानं स्त्रीणां च जातकं तथा ।।
आयुर्दायोऽष्टको वर्गो वक्ष्येतेति यथाक्रमम् ।।

ईश्वर उवाच -

श्रृणु देवि प्रवक्ष्यामि यत्त्वया परिचिन्तितम् ।
आद्यन्तं परमं गुह्यं त्वयोक्तं प्रकटीकृतम् ।।

End :

भिक्षा च रोम होमखं(?)सौरे सूक्ष्मदशाफलम् ।
ज्वरो मसूरिका व्याधि शिरोरोगो ज्वरो मृतिः ।।
कलहे बन्धुनाशं च शतप्राणदशाफलम् ।।

Colophon :

इति मार्ताण्डभैरवीयकालचक्रजातके द्वितीयः पटलः । कालचक्रजातकं च परिसमाप्तम् ।

Serial No. 78

Kālacakranirṇaya, Anon. (MS. No. 71203-d)

Beginning :

अथ वक्ष्ये विशेषेण कालचक्रस्य निर्णयम् ।
तत्कालचक्रं द्विविधं पूर्वं प्रोक्तं महर्षिभिः ।।
भूचक्रं खेचरं चक्रं (इति) सर्वत्र संमतम् ।
मेषादिमीनपर्यन्तं भूचक्रमिति कल्पितम् ।।

वृश्चिकाद्यष्ट सव्येन चापान्तं खेचरं तथा ।
भूचक्रस्य व्यत्यासात् खेचक्रं जायतेऽधुना ।।

End :

पृष्ठतो गमनं वामे जलाद् भीतिः पदच्युतिम् (?तिः) ।
पितृनाशं नृपक्रोधं दुर्गारण्याटनं वदेत् ।। १२४ ।।

Colophon :

इति मण्डूकगमनफलं संपूर्णम् । कालचक्रं संपूर्णम् ।

Serial No. 79

Kālacakravākyāni, Anon. (MS. No.77559-a)

Preliminary :

कालचक्रवाक्यानि । हरिः । ओम् ।

Beginning :

अतः परं प्रवक्ष्यामि कालचक्रफलस्फुटम् ।
आश्विपुनर्वसुहस्ता मूलप्रोष्ठपदानि च ।।
अंशकान् गणयन् मासान् प्रादक्षिण्यक्रमेण तु ।
पौरं गावो माता सहोधी । नक्षत्रदासी चर्वणगः । रूपोऽत्र क्षुन्निधाय रङ्गम् ।
वाणी च सदधी नक्षत्रम् ।
हंसस्तु वशाम्बरपत्रम् ।

End :

उत्तमो मित्रवर्गस्य सम . . .जमध्यमा ।
कनिष्ठः समवश्शेष . . .गो विनागदः ।

Colophon : Nil

Serial No. 80

Kāladīpikā by a brahmin of Śoṇācalagrāma (MS. No. 75532)

Preliminary :

श्रीदक्षिणामूर्तये नमः ।

Beginning :

धात्री यत्करसंपर्कात् सग्रहर्क्षा विराजते ।
तस्मै सर्वात्मने भूयो भास्कराय नमो नमः ।। १ ।।
नत्वा विघ्नेश्वरं वाचं गुरून् चाथ करोम्यहम् ।
(शुभकर्मसु) बालानां कालज्ञानाय दीपकम् ।
क्षमा बलं तु साधूनामिह विद्याब्धिपारगैः ।
अन्यहास्येन किं नष्टं कवेः कर्तुश्च कुत्रचित् ।। ३ ।।
गुळिको विष्टि गण्डान्तं विषोष्णकार्ग (लं तथा)
. . . शिरो लाटो वैधृतं च सुकर्मसु ।। ४ ।।

End :

अनुक्तकर्म भुक्तिर्क्षं तोयं वृद्धिर्विशेषतः ।
सवारतिथिनक्षत्रं चिन्त्यं सर्वं वदेद् बुधः ।। ६७ ।।
अस्ति शोणाचलग्रामे वास्तव्यो द्विजपुङ्गवः ।
दयालुः सर्वभूतेषु देवाराधनतत्परः ।। ६८ ।।
दैवज्ञस्तत्पदाम्भोजमकरन्दनिषेवणात् ।
भ्रान्तचित्तेन केनापि रचितं तद् द्विजन्मना ।। ६९ ।।
दीपकं विलसत्वेतच्चिराय धरणीतले ।
निर्मत्सरेभ्यस्साधुभ्यो भूयो भूयो नमो नमः ।। ७० ।।

एवम् -

कुम्भपूर्तितिथिवारचन्द्रमा वृद्धिरिप्फचन्द्रमन्ददृक् ।
धान्यवृद्धिशुभद..... त्रवणिकाधराशयः ।। ७१ ।।

Colophon :

Chapter I :

इति कालदीपिकाशास्त्रे मुहूर्तनिर्णयः मेषादिगणितविधिर्नाम प्रथमोऽध्यायः ।

Chapter II :

इति कालदीपिकाशास्त्रे गुणदोषकालनिर्णयजातकयोज्यविधिर्नाम द्वितीयोऽध्यायः ।

Chapter III :

इति कालदीपिकाशास्त्रे मुहूर्तपदवीकालदीपिकामञ्जरीप्रकारविवाहादिप्रतिपाद्यन्तविधिर्नाम तृतीयोऽध्यायः ।

Chapter IV :

इति मुहूर्तपदवीकालदीपिकामञ्जरीशास्त्रे प्रतिष्ठाविधिर्नाम चतुर्थोऽध्यायः ।

Serial No. 82

Kāladīpikā by Nārāyaṇa (MS. No. 75687)

Preliminary :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

Beginning :

यस्य भासा प्रदीप्यन्ते ग्रहाः सक्षितितारकाः ।
नमस्तस्मै भगवते सूर्यायामिततेजसे ।।

आलोक्य मुनिभिः प्रोक्तं शास्त्रमाचार एव च ।
क्रियासु क्रियतेऽस्माभिः कालज्ञाना(य) दीपिका ।।

श्रौताः स्मृत्युदिताश्चेति द्विविधा हि क्रिया मताः ।।
अग्न्याधानादिकाः श्रौता निषेकाद्याः स्मृतीरिताः ।
स्मार्त्तेष्वत्र तु तारादेरनुक्तस्य तु संग्रहः ।।

श्रौतेषु स्वोक्त एव स्यात् कालस्त्वनानपेक्षतः ।
तारादिभिर्दिनाद्यैश्च विहितदोषवर्जितः ।।

End :

शुभदैवविदा दत्तः स कालो गृह्यते बुधैः ।
त्रिस्कन्धश्च सुवृत्तश्च सत्यवाग् विजितेन्द्रियः ।।

वसुभिः पूजितस्तुष्टो स दैवज्ञः शुभसूचकः ।
भूत . . . . . णेन सागरैः ।।

निन्दिताः पुष्कराः शस्ताः समिन्मनुजिनाचलाः ।

ग्रहान् यत्नेन संगण्य सिद्धान्तो . . . ।।
स्वस्थचित्तो विविक्तस्थः कालमन्वेषयेच्छुभम् ।।
अनेन विधिना कालं ज्ञात्वा कर्म करोति यः ।
स मुक्तः स . . . . .ष्ठा महीयते ।।
भर्तृनारायणाख्येन विप्रेण रचिता मिता ।
दीपिका विलसत्त . . . . . ।।

Colophon :

इति कालदीपिकायां गुणकालनिर्णयो नाम विंशोऽध्यायः ।

Serial No. 95

Kālaprakāśikā by Nṛsiṃha , son of Varadārya (MS. No. 72427-b)

Preliminary :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चर्तुभुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

Beginning :

शुद्धस्फटिकसंकाशं रत्नसिंहासने स्थितम् ।
पद्मया सहितं नित्यं नारसिंहमहं भजे ।।
गरुडध्वजसेवाढ्यं कलये छत्रधारिणम् ।
यद्ध्यानमात्रात् सन्त्रस्ता प्रत्यूहा यान्ति दूरतः ।।
वाधूलवरदाचार्यपादपङ्कजमाश्रये ।
यदाश्रितानां मुक्तिश्च भक्तिश्च सुलभा भवेत् ।।
वन्दामहे नृसिंहार्यं वाधूलान्वयनायकम् ।
कान्तो(पा)यत् तद् योगीन्द्रकरुणयानृतं जनम् ।।
पदवाक्यप्रमाणज्ञं वन्दे समरपुङ्गवम् ।
कृतार्थाः प्राणिनः सर्वे यस्यावतरणाद् भुवि ।।
पोळिपाक इति ख्याते ज्योतिःशास्त्राब्धितारकः ।

प्राचीनानि विधानानि सम्यग्वीक्ष्य समन्ततः ।।
संक्षिप्य तेषु सारांशं प्रवक्ष्ये कालप्रकाशिकाम् ।।

End :

जिग्मापे नातिब्रह्मेशे . . . . पुत्रसंभवः ।
इन्द्रेशे संपदमित्याह रश्मिभूषितकज्जले ।।

Colophon :

इति कालप्रकाशिकायां द्विचत्वारिंशोऽध्यायः ।।

Serial No. 109

Kālalakṣaṇasaṃgraha, Anon. (MS. No. TR 876)

Beginning :

प्रत्यूहप्रतिहन्तारं प्रार्थनाफलदायिनम् ।
गणाधिपं नमस्कृत्य काललक्षणसंग्रहः ।।
लिख्यते बालबोधार्थमङ्गीकृत्य सतां मतम् ।
पदवी पूर्वकालोक्ता शुभाशुभविनोदिनी ।।
सैषात्र कालगणिता संग्रहस्थानकल्पिता ।
सर्वेषां सुखसिद्ध्यर्थमाधानादिक्रियास्विह ।।
मौहूर्तिकोक्तवाक्यानां सत्यत्वमृषिभिः कृतम् ।
ज्योतिःशास्त्रमिदं सत्यं तत्तत्फलनिरूपकम् ।।
कर्माणि षोडशोक्तानि विप्रवाक्यप्रमाणतः ।
तन्वन् यथाकालमिह फलभाक् नात्र संशयः ।।

End :

यदा दिवैव दृश्येते जीवशुक्रौ नभःस्थले ।
तयोरन्तरतो वापि स कालो बहुदोषदः ।।
प्राह्णि सायाह्णि हीनाह्णि दृश्यत्वं गुरुशुक्रयोः ।
प्राह्णसायाह्नयोर्मध्ये कालेनाह्णिपदोदितः ।।

जीवशुक्रयोरस्तमनं परस्परदृष्टिश्च एते षट् दोषाः दिनमासकार्यतः । एते सर्वे अन्यत्र वर्ज्याः स्युः ।

Colophon : Nil. Ends abruptly.

Serial No. 117

Kālavidhānapaddhati by Trivikrama (MS. No. 70201-b)

Beginning :

श्रियः करारोपितरत्नमुद्रिकामरीचिबालातपरोहिताकृतिम् ।
सतामुपास्यं सुरशेखरीकृतं करोतु शं वो हरिपादपङ्कजम् ।। १।।
प्रणम्य कालात्मकमेकमव्ययं भवं भवानीपतिमिन्दुभूषणम् ।
विदग्धमौहूर्तिककीर्तिवृद्धये करोम्यहं कालविधानपद्धतिम् ।। २ ।।

अविघ्नमस्तु । गणेशाय नमः ।

वेदागमोक्तसमये रुचिरे प्रदेशे वाजीकृतेन जितरोषभयेन पुंसाम् ।
मन्त्रौषधप्रचरतीर्थजलोज्ज्वलेषु कान्ताजनेष्वथ निषेकविधिर्विधेयः ।।

Incomplete.

Serial No. 136

Kālāmṛta by Veṅkaṭayajvan (MS. No. 72081-a)

Beginning :

श्रीमद्वेङ्कटनायकं कुलगुरुं नत्वा सदाभीष्टदं
ज्योतिःशास्त्रपयोनिधिप्रमथनात् सारं समुद्धृत्य तम् ।
विद्वद्भिश्च मनोहरं मृदुपदं संक्षेपतः संस्फुटं
गर्भाधानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ।। १ ।।

End :

लग्नादन्त्यसुताष्टमेषु रहितेषूल्कादिपापग्रहै-
श्चन्द्रे लग्नविवर्जिते च नवमे शिक्ये समं पुंसवे ।। २५ ।।

Colophon : Nil. breaks off abruptly.

Serial No. 141

Kālāmṛta of Veṅkaṭayajvan with auto Comm. Ujjvalā (MS. No. 69022)

Preliminary :

ओम् ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चर्तुभुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

श्री गुरुभ्यो नमः ।

Beginning of Commentary :

श्रीमच्चञ्चलपत्रिवंशजलधेः शीतांशुना धीमता
ध्यात्वा विघ्ननिवारणाय हृदये श्रीदक्षिणाख्यं गुरुम् ।
टीका ज्योतिषशास्त्रतत्त्वमखिलं संगृह्य संभाव्यते
श्रीमद्वेङ्कटयज्वना बुधमुदे कालामृतस्योज्वला ।।
श्रीमच्चित्तलपाडिवंशमहितः श्रीवेङ्कटाख्यो महान्
शान्तः शंकरकिंकरश्च सुषुवे श्रीचिन्नमाम्बा च यम् ।
यस्योदग्रतपोधना श्रुतिविदः श्रीयल्लयज्वादयः
चत्वारस्तु सहोदराः शुचिधियः श्रीरुद्रसंज्ञापकाः ।। १ ।।
वेदे याजुषसङ्गतमसौ योऽजीगणल्लीलया
मन्वादिष्वपि धर्मशास्त्रनिचयेष्वेकाधिपत्यं गतः ।
ज्योतिश्शास्त्रसुधारसं कबळयन् श्रौताधिकेऽजागरीत्
सोऽयं वेङ्कटयाजको विजयते श्रीकुण्डिने पट्टणे ।। २ ।।
कालामृतस्य यत् तत्त्वं नालिकेरफलोपमम् ।
विभज्य तेऽपिबन् सस्यसारं ज्योतिषचञ्चवः ।। ३ ।।

अथ तत्रभवान् कविः स्वचिकीर्षितस्य निष्प्रत्यूहपरिपूरणाय संप्रदाया-विच्छेदलक्षणफलसाधनत्वेन आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धलक्षणत्वाच्च विशेषेष्टदेवतानमस्कारलक्षणमङ्गमेवाचरन् चिकीर्षितं प्रतिजानीते -

Beginning of Text :

श्रीमद् वेङ्कटनायकं कुलगुरुं नत्वा सदाभीष्टदं
ज्योतिश्शात्रपयोनिधिप्रमथनात् सारं समुत्कृष्य तम् ।
विद्वद्भिः सुमनोहरं मृदुपदं संक्षेपतः संस्फुटं
गर्भाधानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ।।

Commentary :

श्रीमदिति । आदौ श्रीशब्दप्रयोगात् . . . . . ।

End :

रोगः स्याद् वसुभस्य चोत्तरदलाद् वृक्षेषु सप्तस्वपि
दुःखं दक्षिणदिक् प्रयातुरथवा तान्यप्रयातुः स्वयम् ।
मीने चेदथ सर्वदिक्षु गमनं यातुश्च वाच्यं भवेत्

Breaks off in the middle of the leaf.

Serial No. 157

Kulīnādivākyāni (MS. No. 69256)

Beginning :

एकविंशतिप्रभवपराभवसंवत्सरादि-मेषमासदिनप्रमाणं च कटपयादि संख्यया कुलीनादिवाक्यानि सम्यक् लिख्यन्ते ।

१ क प मेषादि
कुलीन गोक्षज्ञ विधान तातुय
सव्यस्य हस्तस्य सुपुत्र सत्वरम् ।
तथाद्रि तेनाङ्क मृगाङ्क तातुलम् ।
२ क - - मेषादि

End :

२६ पु मेषादि
कुलीन गोक्षज्ञ हयान तातुया
समस्य सहस्य (सव्यस्य हस्तस्य ?) सुपुत्र सत्वरम् ।

तथाजि मीनाङ्ग मृगाङ्ग काचलम्
क्रमेण मेषादिषु योज (येद्) दिनम्
मित्र प्रभवादि २५प्र

Colophon : Nil.

Serial No. 160

Kṛṣṇīyam by Kṛṣṇavipra (MS. No. 73266)

Preliminary :

गजाननं भूतगणादिसेवितं कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम् ।।

चन्द्रार्ककोटिघटितोज्वलदिव्य . . .श्रीचन्द्रिकाकलितनिर्जलसुप्रभाते ।
कामार्तदायिकलहंसमनोऽधिरूढे वागीश्वरि प्रतिदिनं मम रक्ष देवि ।।

श्री गुरुभ्यो नमः ।

Beginning :

श्रुतिश्रीमङ्गसिन्दूररजोभिः परिशोभितम् ।
देव्याः पदं सदा नौमि यत्रकार्यार्थसिद्धये ।। १ ।।

संसारकष्टषष्ठानां जनानाममृतोपमम् ।
श्रीगुरोः पादयुगलं नमामि शुभसिद्धये ।। २ ।।

श्रीवत्सकुलजातेन गौरमांभिकु (?) सूनुना ।
श्रीकृष्णविप्रवर्येण भेदानां रचिता दशा ।। ३ ।।

अत्युच्चसंस्थितदिनाधिपतेर्दशायां गोवाजिशंखगजवज्रविशेषलाभः ।
धान्याम्बराहरणमौक्तिकरत्नलाभः आबालमित्रसुतबन्धुकलत्रसौख्यम् ।। ४ ।।

End :

तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् । छागादिपञ्चकं द्रव्यं सर्वसंपत्प्रदायकम् ।।
इति शुक्रदशा संपूर्णम् ।
प्रेक्ष्य दशाफलं सम्यक् सर्वेषां तु शुभाशुभम् ।

गुप्तं शुभं —- वीक्ष्य पाराशर्यमतं बुधैः ।।

Colophon :

इति पाराशर्यकृते कृष्णीये उडुदशाफलं दशादिसंपूर्णम् ।।

Post-colophon :

रवेस्तु वृषभमुच्चं केतोस्तु कीटमेव च ।
कर्कटं स्वत्रिकोणं तु कन्यकां स्वगृहं विदुः ।।
राहुकेत्वोद्यर्कपीक्ष्या (?)क्षी जीवो मित्रगृहं गतः ।
रविचन्द्रौ च शत्रू च शेषास्सर्वे समाः स्मृताः ।।
पञ्चम्यारदशा मृत्युः दद्यात् षष्ठी गुरोर्दशा ।
शनेश्चतुर्थो मृत्युः स्याद् दद्यात् सूरिस्तु पञ्चमे ।
षष्ठविष्टमन्यदेशानां . . . . . कष्टकष्टफलप्रदाः ।।

Serial No. 161

Keralacandrikā, Anon. (MS. No. 69282)

Preliminary :

शुभमस्तु । अविघ्नमस्तु । केरलम् । श्रीराम ।

Beginning :

अथातो सर्वफलपद्धति (?) । वक्ष्यमाणान् (?) । यमलजातकमादौ वक्ष्यामि ।
जन्मलग्नात् त्रि..टयेशः (?) चन्द्रलग्नाधिपान्वितः ।
राहुकेत्वन्वितो दृष्टो जायते यमलौ तथा ।। १ ।।
विलग्नचन्द्रलग्नेशौ पुरुषौ चेदुभौ यदि ।
पुंयुगं जायते तत्र तावुभौ त्रिग्रहौ यदि ।। २ ।।

End :

हिमांशुः सप्तमस्थाने अष्टमस्थितये गुरुः ।।

. . . . . .

Breaks

Colophon :

इति केरलचन्द्रिकायां पूर्वभागः समाप्तः ।।

Serial No. 170

Gaṇakānanda by Sūrya, son of Bālāditya (MS. No. 77517)

Beginning :

आनन्दं ब्रह्म चिद्रूपं विधिविष्णुशिवात्मकम् ।
नित्योदयं मुनिस्तुत्यं बालादित्याह्वयं नुमः ।।
बालादित्यसुतः सूर्यः सूर्यसिद्धान्तसंमतम्
वक्ष्येऽहं गणकानन्दं गणकानन्दकारणम् ।।
शकाब्दा नवशैलेन्दुगुण (३१७९) युक्ता कलेर्गताः ।
गजवेदशराम्भोधि (४५४८) हीनं तत्करणाब्दकम् ।।

End :

बिम्बापराग्रतद्योगात् प्राक्शुक्लमसितं न्यसेत् ।
सितासितं ततः प्राच्यां पक्षार्धद्वितयावधि ।।
न्यसेच्छेदस्ततः पश्चात् छिन्द्यात्तेनेन्दुमण्डलम् ।
नीचोर्ध्व(मा)युरेखायां दृश्यते शृङ्गमुन्नतम् ।।

Colophon :

इति सूर्यकृते ग्रन्थे गणकानन्दनामनि ।
शृङ्गोन्नतिप्रबोधार्थमष्टमोऽध्याय ईरितः ।।
श्लोकैस्त्रिबाणभूमानै(१५३)रष्टाध्यायसमन्वितैः ।
गणितं गणकानन्दं रचितं सूर्यसूरिभिः ।।

Post-colophon :

हरिः ओम् । शुभमस्तु ।
श्रीकृष्णाय परमगुरवे नमः ।।

Serial No. 172

Gaṇitaviṣaya, Anon. (MS. No. 75263-b)

Preliminary :

गणपतये नमः । शुक्लां. . . . . शान्तये ।

Beginning :

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणाात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ।।
प्रणम्य हरिकेशस्थमहं कमललोचनम् ।
भास्करीयानुसारेण गणितं क्रियते लघु ।।
षष्टिश्चतुर्विंशतिगुणितं व्यपगतप्रभववर्षसंमिश्रम् ।
ग्रहवेदाश्विसमेतं शकवर्षं धूसीकालयुतं कल्यब्दम् ।।
कल्यब्दो मातुलगुणो वर्षवांशेन संयुतः ।
पुनरब्दान्मानगुणात् सालप्रियविवर्जितात् ।।
तत्समाप्तदिनैर्युक्तं घटीविघटिकादिभिः ।
युतं कल्यादिशुद्धस्य शुक्रवारादिकं दिनम् ।।

End :

ज्ञानदघ्नं विषं नाड्यश्चन्द्रगत्या विवर्जितः ।
पूर्वक्षेण च संयुक्ता विषनाड्यः प्रकीर्तिताः ।।
तत्साधनार्कभुजगंगकलंश्चरघ्न-
नेतानिलेन विहृता यदि तद्विनाड्यः ।
नागप्रमाणघटिकासु धनं क्रियादौ
जूकादिके सति ऋणं तदहः प्रमाणम् ।।

Colophon : Nil.

Serial No. 174

Gaṇitasaṃgraha, Anon. (MS. 77519)

Margin :

श्रीराम । सूर्यसिद्धान्तसंग्रहम् ।

Beginning :

करेणैकेन कोदण्डमितरेण शरं धरन् ।
पातु रामः परानीकभेदी विघ्नान् भिनक्तु नः ।। १ ।।
श्रीराघवं नमस्कृत्य सीतालक्ष्मणसंयुतम् ।
बालानां सुखबोधार्थं वक्ष्ये गणितसंग्रहम्।। २ ।।
षष्टिरेकोनत्रिंशघ्नरुद्रोनप्रभवादियुक् ।
शकाब्दा नवशैलेन्दुवह्नियुक्ताः कलेर्गताः ।।
कल्यब्दो रविभिर्गुण्यो मासैश्चैत्रादिभिर्युतः ।। ३ ।।

Colophon :

इति सिद्धान्तसंग्रहे मध्यमाधिकारो नाम प्रथमोऽध्यायः ।
स्फुटाधिकारो नाम द्वितीयोऽध्यायः ।
ग्रहणाधिकारो नाम तृतीयोऽध्यायः ।
इति सिद्धान्तसंग्रहे पाताधिकारो नाम चतुर्थोऽध्यायः ।।

Post Colophon :

शुभमस्तु ।

Serial No 191

Grahaceṣṭāvidhāna, Anon. (MS. No. 67830)

Preliminary :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

Beginning:

श्रीमद्वराहमिहिराद्यवसिष्ठगार्ग्यश्रीसिद्धसेनयवनार्यपराशरादयैः ।
यत् खेटवीर्यवशतो भुवि मानवानां यद्यत् शुभाशुभफलं सकलं प्रदिष्टम् ।। १।।
तत्रापि जन्मसमयोद्भवतुल्यखेटैः पापाधिकान् कलियुगे तु महान् प्रमादः ।
तान्येव यानि सुकृतानि फलानि तेषां नृणां फलन्ति न फलन्ति कदाचिदेव ।।२।।
तस्मादहं सकलखेचरचेष्टयैव वक्ष्येऽधुना सकललोकफलं विचित्रम् ।
शास्त्रेषु तेषु सकलेष्वपि तत्कृतेषु प्रोक्तं रहस्यमविशेषमतोऽपि रम्यम् ।। ३।।

End :

व्यये भृगुस्तद्भवनेऽपि वित्तव्ययं करोत्येव महीसुराणाम् ।
नीचे तु दुर्मार्गपृघात्(?) प्रणाशपापे क्षितः पापग्रहांशकादौ ।। ३१ ।।
एवं भृगोश्चेष्टितजातमेतत् फलं नराणां कथितं महद्भिः ।।३२।।

Colophon :

इति ग्रहचेष्टाविधाने नवमोऽध्यायः ।

Two mescellaneous vv follow.

Serial No. 254

Jātakacandrikā by Bhūgola Veṅkaṭeśa (MS. No. 71869-a)

Beginning :

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किंचिद् वीणाधरमुपास्महे ।।
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।
वयं पाराशरीं होरामनुस्मृत्य यथामति ।।
बुधैर्भावादयः सर्वे ज्ञेयास्सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ।।

Colophon :

इति पञ्चमं समायनप्रकरणम् ।

इति श्रीकालिदासप्रोक्ता जातकचन्द्रिका संपूर्णा ।

Note :

Some manuscripts like the present one name the author as Kālidāsa and the other name of the text is Uḍudāyapradīpa.

Serial No. 265

Jātakacandrikā with Comm. Śaradāgama of Narasiṃha (MS. No.73320-a)

Preliminary :

श्रीगुरुभ्यो नमः । गणाधिपतये नमः । हरिः ओम् ।

Beginning of Commentary :

ज्योतिर्मयामयसपक्षदिनाभिधेया-
मब्जाननादिसुमनस्समुपासनीयाम् ।
भूमीन्द्रराजतनयां शिव(राज)पत्नी-
मम्बां नमाम्यहमविघ्नवचःप्रसिद्धयै ।। १ ।।
कौण्डिन्यमौन्यभिजने श्रिततैत्तिरीय-
शाखे च वह्यमभिधान्वयसिन्धुमध्ये ।
जातः सुधाकर इवातियशा विपश्चि-
च्छ्रीतिम्मयाख्यः चयनीकृतसप्तयज्ञः ।।
तस्य प्रिया परमभाग्यवती हि यज्ञ-
मम्बा तयोस्सुतयोर्विदुषां वरिष्ठः ।
यल्लद्विजोऽन्य युवतिस्तु पतिव्रताग्र्या
लिङ्गाम्बिका सुतवरश्च तयोर्बभूव ।।
सांवत्सरस्तिरुमलोन्नुम (?) नाम पत्नी
तस्य द्वयोस्तनययोस्सुषुवे तदग्र्यः ।
श्रीरामदीक्षितसुधीर्गुरुरम्बिकास्स-
पत्नी महागुणवती ह्यनयोस्तु सूनुः ।।
अप्पाभिधश्च नृहरिः प्रथमस्तयोस्तु
श्रीमच्छिवाङ्घ्रिसरसीरुहमाननम्(?) ।

श्रीकालिदासकृतजातकचन्द्रिकायाः
व्याख्यां करोमि शरदागमनामधेयाम् ।।

अथैतस्याः जातकचन्द्रिकायाः यथामति व्याख्यां कर्तुमुद्यश्चन्नादौ पञ्चप्रकरणानां मध्ये संज्ञाप्रकरणं व्याकुर्वे । तत्र तावद् ग्रन्थकर्ता भगवान् कालिदासः प्रथमश्लोके ग्रन्थस्य पारम्पर्यप्रवृत्तिरूपाभीष्टसिद्धये सारस्वतोपाधिविशिष्टसंविदुपासनारूपं मङ्गलमाचरति - सिद्धान्तमौपनिषदमिति ।

End :

इति श्री कालिदासस्य नाम्ना जातकचन्द्रिका ।
संज्ञायोगायुष्यभुक्तिलग्नप्रकरणो बभौ ।।

Serial No. 266

Jātakacandrikā by Yājñikanātha (MS. No. PM 1322)

Preliminary :

श्रीगणेशाय नमः ।

Beginning :

विघ्नेशवाणीगिरिजारमेशपादाम्बुजानेकधिया प्रणम्य ।
अवाप्तसन्नाकनिकेतसौख्यैश्चानाकुमातुश्चरणाम्बुजे च ।। १ ।।
वेदार्थरत्नाकरपारगामिस्तदुक्तकर्माश्चरणाभिमानी ।
जम्बूशरस्थद्विजपद्मवृन्दप्रकाशसूर्यो हरजिद् द्विजोऽभूत् ।। २ ।।
आचाररत्नाकरमन्दराद्रिस्तत्सूनुराशिर्बलभद्रनामा ।
तत्सूनुना याज्ञिकनाथनाम्ना विरच्यते जातकचन्द्रिकेयम् ।। ३ ।।
त्रिपुरविजयकाले शंकरेणाथ धात्र्या निजकृतपरिशि(ष्ट)देववृन्दै स्ततोऽयम् ।
त्रिभुवनजयकार्ये कामदेवेन नूनं हरतु सकलविघ्नं विघ्नराजः स देवः ।। ४ ।।

नित्यं नृत्यतु तन्मुखाङ्गणगता वाग्देवता सुस्थिरा
पद्मा तन्निलयाश्रया विलसतां कान्तिः शरीरे स्थिरा ।
आयुर्भूरितरं शरीरमदजं नित्यं प्रसादो हरे-
र्यस्येयं विमलाग्र्या(?युषा)स्वरचिता पत्री मया लिख्यते ।। ५ ।।

End : Not readable.

Colophon :

इति श्रीयाज्ञिकनाथविरचितायां जातकचन्द्रिकायां विलिखनक्रमाभिधानः प्रथमः प्रबोधः समाप्तः ।

Serial No. 267

Jātakacandrikāsārasiddhānta, Anon. (MS. No. PM 1363)

Preliminary :

श्रीगणेशाय नमः ।

Beginning :

अथ पञ्चाङ्गश्लोकः -

तिथिर्वारश्च नक्षत्रं योगः करणमेव च ।
श्रुत्वा च लभते पुण्यं गङ्गास्नानभवं महत् ।। १ ।।

तिथयः -

नन्दा भद्रा तथा रिक्ता पूर्णात्र तिथयः क्रमात् ।
वारत्रयं समावृत्य तिथयः प्रतिपन्मुखाः ।। २ ।।

अथ तिथिस्वामिनः-

End :

अन्धे रक्षेद् दिशं पूर्वां ककुरे दक्षिणं पुनः ।
पश्चिमां चिपरैर्धिप्त्यैर्दिव्यचक्षुत्रिरुत्तमम् ।। ७७ ।।

जन्मे रक्षे रुद्रसवर्णमाह द्विपं चनं दारजनश्रुतं च ।
त्रिसप्तदिक् ताम्रपदं वहन्ति चतुष्ट अर्काहिति लोहकाष्ठम् ।। ७८ ।।

Colophon :

इति श्रीसारसिद्धान्तः ।।

Serial No. 270

Jātakadīpikā, Anon. (MS. No. 78225-a)

Beginning :

प्रणिपत्य हरिं वक्ष्ये कालचक्रस्य लक्षणम् ।
सव्यापसव्यनक्षत्रमश्विन्यादित्रिकं त्रिकम् ।।
दक्षिणत्रिकहं पश्चाद् द्वादशांशमजादिषु ।
चक्रं प्रदक्षिणं कृत्वा मीनान्तं विन्यसेत् सुधीः ।।

End :

ब्राह्मणेनोपजीवश्च धनलाभो रिपुघ्नता ।
पूर्ववित्तक्षयं याति जीवे गुरुदशां गते ।।
तीक्ष्णकर्मप्रतापश्च जपलभ्यं च यो भवेत् ।
जनेन लभ्यते सौख्यं जीवे भौमदशां गते ।।

Colophon :

इति जातकदीपिकायाम् अपसव्यक्रमो नाम त्रयोदशोऽध्यायः ।

Serial No. 272

Jātakapaddhati by Śrīdhara (MS. No. 67852-c)

Preliminary :

श्रीगुरुभ्यो नमः ।

Beginning :

कुर्यात् सायनलग्नतश्चरकलाप्राणान्तरे ततृकृता-
लग्नाश्चासु कलान्तरं त्रयमहः स्वर्णं दशाखे(?) सुखैः ।
त्र्यंशोनं च तदन्तिके तनुमतेनान्येषु तत्त्र्यंशकं
भापा स्युर्गृहजास्तु ते स्फुटसमाः सन्धिद्वयैक्येऽर्धिते ।।

End :

चेष्टोच्चबलयोगार्धं दशांगोनिमधकराम् ।
ये तु स्वधर्मनिरताः विजितेन्द्रियाश्च ये पथ्ययोजनजुषो द्विजदेवतानाम् ।
ये मानवा दधति ये कुलशीललोलास्तेषामयं कथितमायुरुदारधीभ्यः ।।
हरिहरसरसीरुहासनहरिहयमुखदैवतैक्यमपनिहता ।
श्रीगुरुपदद्वन्द्वं बहुविधमतुलमाहात्म्यमाश्रये सततम् ।।
गण्डान्तनिर्गलितार्गलदानधारागण्डभ्रमद्भ्रमरवारणकर्णतालम् ।
ग(च्छन्)मनोरममहार्णवपारमाद्यं गङ्गाधरस्य तनयं शरणं प्रपद्ये ।।
पञ्चदशाक्षरकृताकृतिरक्षमालां चिन्तासुधाकलशपुस्तकवाहबाहाम् ।
तां देवतां द्रुहिणयत्नममोघयन्तीं वन्देऽथ कुन्दरचितेन्दुकलावतंसाम् ।।

Colophon :

इति श्रीधरकृतजातकपद्धतिः संपूर्णा ।

Serial No. 276

Jātakabhaṅga, Anon. (MS. No. 75725-a)

Margin :

जातकभङ्गम्

Beginning :

जीवे सकेतौ यदि वा सराहौ चण्डालता पाप निरीक्षिते चेत् ।
नीचांशके नीचसमन्विते वा जीवे द्विजश्चेदपि तादृशः स्यात् ।।
कुजारिमन्दैस्सहितेन्द्रपूज्ये शुक्रेक्षिते वा शशिसूनुदृष्टे ।
शूद्रोऽपि विप्रत्वसमानमेति विद्यां च सर्वामधिगम्य जातः ।।

End :

प्रागाद्य अमुनोदितो विहगदिक् प्रागादितो राशिभिः ।
. . . .समीपमध्यगतताजाद्यवाप्तभांशैस्तयोः ।।
. . . .उदचन्द्राणां गुळिके केन्द्रसंस्थिते
मन्ददृष्टेऽथवा . . . दिं रिपुकृतं वदेत् ।।

Colophon : Nil.

Serial No. 278

Jātakabhūṣaṇa, Anon. (MS. 75713)

Beginning :

वन्दे मन्दारमूलस्थं वृन्दारकनिषेवितम् ।
कुन्देन्दुस्फटिकाकारं चन्द्रमौलिं शिवाप्तये ।।
परस्परविरुद्धार्थज्योतिश्शास्त्रार्णवोदरे ।
मज्जतामवलम्बाय वक्ष्ये जातकभूषणम् ।।
स्थिरराशिगता खेटाः —चरानुचरा गतान् ।
पश्यन्ति राशीनुदयान् भ(?)क्षे आगता ग्रहाः ।।

End :

देशनिर्वासनं वा स्यात् कष्टं वा महदश्नुते ।
शशिकोणगते पापे निश्चयं दुःखमादिशेत् ।।
एवं शुभाशुभं सर्वं निश्चित्य प्रवदेत् बुधः ।

Colophon :

इति दशाफलम् । जातकभूषणं समाप्तम् ।

Serial No. 289

Jātakālaṃkāra, Anon. (MS. No. 71203-b)

Preliminary :

सूर्यादिनवग्रहदेवताभ्यो नमः ।

Beginning :

अथ आदित्यहृदये देहस्थानाधिपः सपापः षष्ठाष्टमव्यवस्थितश्चेद् देहसौख्यं न भवति । बलहीनोऽपि केन्द्रत्रिकोणश्चेद् बलहीनः लग्नाधिपतिः ।

End :

पिङ्गलाक्षो विशालाक्षो अन्धशूरो धनप्रियः ।
अपोहरो(?) रतिद्वेषी गर्वा—नण्डजो नरः ।।

सत्ये रतः कालदक्षो यजिष्टश्शास्त्रपारगः ।
. . . कालं सदा वाग्मी कन्यायां परदेशकः ।।

Colophon : Nil.

Serial No. 315

Jñānapradīpakam , Anon. (MS. No. 69462-b)

Preliminary :

शुभमस्तु ।

Beginning :

श्रीमद्वङ्गाधरसुतं चन्द्ररेखावतंसकम् ।
सिद्धिदं सर्वविद्यानां वन्दे दन्तावळाननम् ।।

ज्ञानप्रदीपकं नाम शास्त्रं लोकोपकारकम् ।
प्रश्नशास्त्रं प्रवक्ष्यामि सर्वशास्त्रार्थसारकम् ।।

भूतं भविष्यद् वर्तमानं शुभाशुभनिरीक्षणम् ।
पञ्चप्रकारमार्गं च चतुष्केन्द्रबलाबलम् ।।

End :

ज्ञानप्रदीपकं शास्त्रं सर्वेषाममृतोपमम् ।
एतच्छास्त्रान्यनिपुणं न भूतो न भविष्यति ।।

Colophon :

इति ज्ञानप्रदीपकं संपूर्णम् ।

Post-colophon :

विरिञ्चिनामके वर्षे कुम्भमासे रवेर्दिने ।
लिखितं कृष्णमार्येण ज्योतिःशास्त्रं सुनिर्मलम् ।।

Serial No. 319

Jyotirnibandha, Anon. (PM 1327)

Beginning :

अथ यात्राप्रकरणम् -

षष्ठे चन्द्रबले तिथौ च दिवसे लग्ने च ताराबले
इष्टे चैव दिगीश्वरे सुशकुने यात्रानुकूलेऽनिले ।
सुस्वप्ने शुभवाजिकुञ्जररथैः संप्रस्थितो लग्नगै-
र्गन्तव्यं विजयाय भूमिपतिना हृष्टे तथा चेतसि ।।

End :

वेधबन्धं रुजं कृते (?) शिवादीप्तिरिळा क्रमात् ।
लाभं क्षेमं जयं राज्यं सौख्याप्तिः शान्तिपञ्चके ।। ५२ ।।

अथ पुरप्रवेशः ।

पौष्ये धनिष्ठास्वथ वारुणे च स्व. . .र्क्षेतिसृ . .न्तरासु ।
अक्षीणचन्द्रे शुभवासरेषु तिथ्यावरिक्ते च पुरप्रवेशः ।।
रिक्ता तिथिर्भूसुतभानुवारे निन्द्याश्च योगाः परिवर्जनीयाः ।
मेषः क्रूलरोमकरक्तला च ताड्या प्रवेशे हि तथा तदंशाः ।। ४ ।।

Colophon :

इति पुरप्रवेशः ।

Serial No. 327

Jyotiṣaphalaratnamālā, Anon. (MS. 77332-a)

Margin :

हरिः ओम् । शुभमस्तु ज्योतिषफलरत्नमाला ।

Preliminary :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

Beginning :

श्रीविक्रमार्को जगतीतलेऽस्मिन् जीयान् मनुप्रख्ययशा नरेन्द्रः ।
पुपोष यत्कोगसु(?)वक्रतो मां सबान्धवं सप्ततिवत्सराणि ।।
अत्राध्यायत्रिंशद् ग्रन्थमितिस्संख्यया पुनः ।
द्विसाहस्रं नानावृत्तविचित्रं कुर्मः श्रीविक्रमार्कनृपतिकीर्त्यै ।।

करबदरसमानं शास्त्रमेतद् विपश्चिन्
नियतकमपि विलोच्य श्रेयसे यन्नराणाम् ।
यदि वदति तदानीं देवतुल्यो मनुष्यः
परमशिवपदं च प्राप्नुयादन्त्यकाले ।।

End :

भो भो ज्योतिषिकातिमात्रकथनैः शास्त्रान्तरैः केवलैः
प्राप्तव्ये यदि यत्फलं न वसुधाकल्पं प्रभूणां मतम् ।
कृष्णाख्यं मधुरां कृतिं मधुभिदं प्रीत्यै महामालिकां
कण्ठक्षोणिपतेः सभां विदधतां धत्तां मुदं सन्ततः ।।

Colophon :

अध्याया द्वात्रिंशद्ग्रन्थमिति संख्यया द्विसाहस्रम् । तत्र ज्योतिषफलरत्नमाला समाप्ता ।

Post-colophon :

श्रीसद्गुरुचरणारविन्दाभ्यां नमः । श्रीकृष्णो रक्षतु । प्लवङ्गवर्षे कन्यामासं अष्टाविंशतिदिवसम् अयं ग्रन्थः संपूर्णः ।

Serial No. 353

Jyotiṣasaṃgraha, Anon. (MS. No. 69919)

Beginning :

दिवसो गुणदोषाभ्यां निश्चितः स्यात् परस्परम् ।
केवलं गुणसंयुक्तो देवानामपि दुर्लभः ।।

Tamil gloss follows.

End : Brittle and broken, and not readable.

Serial No. 365

Jyotiṣārṇava by Kadambeśvarāmba (MS. No. 67998)

Colophon :

(Beginning and End missing). The Colophon at the end of the Stabaka V reads :

महाराजाधिराजा प्रतापरुद्रदेवगजपतिपादारविन्दषट्पदायमानसेन सकलविद्वज्-जनचरणपरिचरणसंपादितप्रज्ञाविभवेन चतुराचारनिखिलेश्वररङ्गमायाभण्डारधूर्तकर्कशादिबिरुदेन महेश्वरमहाप्रसादिसुतेन कदम्बेश्वराम्बेन विरचिते ज्योतिषार्णवे पञ्चमः स्तबकः ।

Serial No. 367

Jyotissāra by Krsnadeva wih Comm. (MS. No. TR 1007)

Preliminary :

श्रीरामः । ओं सूर्याय नमः ।

Beginning :

अथ ज्योतिषशास्त्रं ज्योतिस्सारम् -
श्रीसूर्यविधुशती च श्रीगुरुं श्रीरघूत्तमम् ।
नत्वा चष्टे कृष्णदेवो ज्योतिस्सारं सतां मुदे ।।
प्रकाश्यते प्रदीपेन वर्तमानघटादिकम् ।
ज्योतिस्सारप्रदीपेन विश्वं कालत्रयोदितम् ।।
सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नक्षत्रचरणाङ्कितः।।

Beginning of Commentary :

अस्यार्थो यथा - अश्विन्यादिसप्तविंशतिनक्षत्रैः ज्योतिश्चक्रं भवति । तत् चक्रं स्तिमितवायुगम्, स्थिरेण वायुविशेषेण कृतम् । तस्यार्कांशो द्वादशांशोऽश्विन्यादि . . . नवपादाङ्किताः राशिर्भवेत् ।

End of Text :

रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः ।
नखरविदिक्तिथिनखराश्चेन्दोः दिग्भागकाः सूच्याः ।।

End of Commentary :

रविभौमादिशन्यन्तानां पञ्चानां क्रमेण सिंहमेषधनुतुलाकुम्भेषु विंशतिः द्वादश पञ्चदशविंशतिर्मूलत्रिकोणदशम् ।

Serial No. 370

Tantrasaṃgraha with comm. by Nīlakaṇṭha (MS. No. 75706-a)

Preliminary :

हरिः श्रीगणपतये नमः ।

Beginning of Commentary :

प्रत्यूहव्यूहनिहतिकारकं परमं महः ।
अन्तःकरणशुद्धिं मे विदधातु सनातनम् ।।

Beginning of Text :

हे विष्णो निहितं कृत्स्नं जगत् त्वय्येव कारणे ।
ज्योतिषां ज्योतिषे तस्मै नमो नारायणाय ते ।।

एकप्रभृतिशब्दानां दशघ्नानां यथोत्तरम् ।
स्थानानि दक्षिणादीनि न्यसेत् संख्यावधीनि च ।।

एकदशशतसहस्रमयुतलक्षप्रभृतिकोटयः क्रमशः ।
अर्बुदमब्दं खर्वनिखर्वमहापद्मशंखस्तस्मात् ।।

जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संख्याः ।।

End of Commentary :

युगानां स्वद्वादशांश आदौ स ज्येति कीर्त्यते ।
स्वान्ते ज्यासमः कालः स ज्यांश इति कीर्तितः ।।

End of Text :

चक्रांशाद्यङ्किते वृत्ते तन्मध्यासक्तचक्षुषा ।
ज्ञेयं ग्रासान्तरं बिम्बदृग्ज्याचापान्तरं स्फुटम् ।।

गोलः कालः क्रियाश्चापि द्योत्यतेऽत्र मया स्फुटम् ।
लक्ष्मीशनिहितध्यानैरिष्टं सर्वं हि लभ्यते ।।

Colophon :

इति गार्ग्यनीलकण्ठविरचिते तन्त्रसंग्रहे अष्टमोऽध्यायः ।

Serial No. 373

Tithikalpadruma by Kalyāṇa (MS. No. PM 1331)

Preliminary :

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

Beginning :

गौरीं गिरं दिनकरं गुरुपादपद्मं सर्वान् खगान् हरिहरात्मभुवः प्रणम्य ।
दैवज्ञवृन्दकृपया खलु संप्रवक्ष्ये पञ्चाङ्गपत्ररचनां सुमनोहरां तु ।। १ ।।
शिववह्नयो रामबाणा द्विनेत्रास्तु लोकाग्नयः शुद्धिः . . . . प्रदिष्टः ।
विधुर्बाणचन्द्रा कुशला स्युरष्टे (?) तथात्यष्टः सप्तचन्द्राः भवन्ति ।। २ ।।

End :

राहुसाधनम् -

धनमम्बुधयोः गगनं च रसा रदनोऽश्वघटी पलकेषु ऋणम्
त्रिरसैर्दिवसैर्नव पत्रतमो गतसंक्रमतोऽभिनवः स भवेत् ।।

वर्षनाम -

नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री ।
तस्यांशं वक्तव्यं वर्षं मासक्रमेणैव ।।

Colophon : Nil.

Serial No. 374

Tithinirṇaya, Anon. (MS. No. 75706-c)

Beginning :

जगद्गुरुं नमस्कृत्य कमलागृहमेधिनम् ।
करोमि सुकृतप्रीत्यै श्राद्धार्हतिथिनिर्णयम् ।।
सौरेण वाथ चान्द्रेण मानेनैकेन केनचित् ।
पूर्वैराचरितेनैव व्रतश्राद्धादिकं चरेत् ।।

End :

अतः पैतृककर्मादौ तत्कालचरबीजकैः ।
बाणवृद्धा रसक्षीणा ग्राह्या नान्या तिथिः क्वचित् ।।

Colophon : Nil.

Serial No. 377

Trivikramaśataka by Trivikrama with Comm. (MS. PM 1332)

Preliminary :

श्रीगणेशाय नमः । ओं नमः सूर्याय ।

Beginning of Text :

नमस्कृत्य परं ब्रह्म गणकेन्दुस्त्रिविक्रमः ।
मुनिप्रणीतमखिलं व्यवहारं प्रवक्ष्यति ।।

Beginning of Commentary :

इह जगति सर्वे बुधाः अनिष्टे वर्तमानाः सन्तः अधिकृताभीष्टदेवतानमस्कारपुरःसरं प्रवर्तते इति मत्वा श्रीमौद्गल्यगोत्रोद्भवगणकचक्रचूडामणिः नारायणस्याङ्गजो महाकारुणिकः त्रिविक्रमाचार्यः प्रथमश्लोकेनास्य प्रपञ्चजातस्याधारभूतं परं ब्रह्म एव आदौ नमस्कृत्य तदनुसंबन्धप्रयोजनाभिधेयान्याह । त्रिषु विषयेषु होरागणितसंहिताख्येषु स्कन्धेषु विशेषेण क्रमणं यस्य सः त्रिविक्रमाचार्यः ज्योतिःशास्त्रस्य त्रीनपि स्कन्धान् जातकगणितसंहिताख्यान् जानातीति सत्यार्थनामा ज्योतिर्विज्ञानानां मध्ये चन्द्रः स ऋषिभिरङ्गीकृतं समग्रं व्यवहारं कथयति ।

Text :

नन्दा भद्रा जया रिक्ता पूर्णेति च पुनः पुनः ।
शुक्रज्ञारार्किजीवाश्चेत् सिद्धाः स्युः तिथयः क्रमात् ।। २।।

End of Text :

नारयणस्य तनयो ज्योतिर्मल्लानुजो द्विजः ।
त्रिविक्रमः शतश्लोकं व्यवहाराममुं व्यधात् ।। २०१ ।।

End of Commentary :

त्रिविक्रमो नाम गणक इमं व्यवहारं व्यधात् । व्यव इति उपनिबन्धा । किं कृतम् ?

शतश्लोकं शतं श्लोकाः यत्र तद् विशिष्टो द्विजन्मा । किंभूतः पुत्रस्तनयः सुतः । कस्य ? नारायणस्य नारायणनाम्नो दैवज्ञस्य । किंभूतः ज्योतिमल्लस्यावरजोऽनुजः कनीयान् ।

अधुना शास्त्रस्य पौरुषेयत्वमाह -

किंचित् कलियुगे याते ब्रूते ब्रह्मा त्रिविक्रमम् ।
तव जिह्वाग्रसंस्थेन शास्त्रमेतन्मया कृतम् ।। २०२ ।।

किंचित् स्तोकं कलियुगे याते सति ब्रह्मा हिरण्यगर्भः त्रिविक्रमं ज्योतिर्विज्ञं विप्रं प्रति इदं ब्रूते इति किम् । यदेतच्छास्त्रं हे त्रिविक्रम तव जिह्वाग्रसंस्थेन मया ब्रह्मणोक्तमिति । इति शास्त्रस्यास्य ब्रह्मवाक्यवत् सत्यमुक्तम् ।

Colophon :

इति ज्योतिषाभरणे त्रिविक्रमपण्डितकृतौ त्रिविक्रमशताभिधाने ग्रन्थे सटीकं त्रिविक्रमशतं संपूर्णम् ।

Post-colophon :

संवत् १७५० वर्षे शाके १६५५ अस्मिन् शुक्लषष्ठी बुधवासरे लिखितोऽयं ग्रन्थः समाप्तः । लेखकपाठकयोः शुभं भवतु । श्री श्री श्री ग्रन्थसंख्या ७०० । इदं पुस्तकं रामकृष्णस्य ।

Serial No. 381

Trailokyacintāmaṇi, Anon. (MS. No. TR 347-a)

Preliminary :

श्रीगुरुभ्यो नमः । त्रैलोक्यचिन्तामणिः ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

Beginning :

भानोर्लग्नं प्रपन्ने च स्वत्रिकोणगतेऽपि वा ।
केन्द्रे वामरपूज्ये च पित्रादि सुखमाप्नुयात् ।। १ ।।
तदीशो बलवानस्य पितुर्द्रव्यगतः सुखी ।
पापदृष्टियुतो वापि पित्रारिष्टं विनिर्दिशेत् ।। २ ।।

End :

नवमे श्वशुरं हन्ति सर्वं हन्ति दशांशके ।
लग्ने लग्नद्वितीये वा सप्तमे अष्टमस्तथा (अष्टमे तथा ?)।।
भानुभौमार्कजौ स्थित्वा आत्महानिर्न संशयः ।
द्वादशे रविमन्दौ च क्षीणचन्द्रस्तथैव च ।।
पितुर्मरणमाप्रोक्ता न केन्द्रे देवपूजिते ।।

Colophon :

अरिष्टजातकफलं संपूर्णम् ।

Serial No. 385

Daśāphala or Daśāntardaśāphalam, Anon. (MS. No. PM 1334)

Preliminary :

श्रीगणेशाय नमः ।

Beginning :

सिन्दूरं यस्य गण्डे नवकुसुमलता दिव्यमाला च कण्ठे
दण्डश्चेद् दक्षिण. . . . . वामहस्ते कुठारः ।
सिद्धिर्यस्याङ्गसङ्गे गुडघृतसहितं मोदकं वामपाणौ
श्रीमान् मूर्तिः प्रचण्डः स भवतु वरदो भक्तिमन्तं गणेशः ।। १ ।।
विना ग्रहैः स्पष्टतरैर्न किंचित् फलं प्रवक्तुं नितरां क्षमः स्यात् ।
. . . . . मानं खलु साधनार्थं क्रमं . . . .दैवविदां हिताय ।। २ ।।
पश्चाङ्गं संक्रमोऽर्काद् दिनरजनिघटीभुक्तभोग्यप्रमाणं
मेषाद्याः कष्टदाः स्युः स्फुटरविगणितं भावचक्रस्य भावः ।
षड्वर्गश्चाष्टवर्गो विविधगणितजास्तत्फलं जातकोक्तं
तज्ज्ञानं विना यो जगति गणको हास्यतामत्र लोक्यः ।।

End :

अथ स्वरदशा -

मित्रातिमित्रभागे च सौख्यलाभादि द्वादश ।
स्वस्थाने शुभफलं ज्ञेयं शान्ते भागेऽपि तत्फलम् ।।

शत्रुभागेऽतिशत्रोश्च ह्यशुभं निधनं वदेत् ।
दशा चान्तर्दशा प्रोक्ता सप्तधा नि . . पुङ्गवैः ।।

Colphon :

इति नानाविधं दशान्तर्दशागणनम् ।

Post-colphon

संवत् १८००, शके १६६५, पौषः शुक्लपञ्चम्यां चेन्दोः ।

Serial No. 391

Daśāphala or Grahajanyadaśāphala by Narasiṃha (MS. No. PM 1315-b)

Preliminary :

श्रीगणेशाय नमः ।

Beginning :

गणनाथं प्रणम्यादौ ग्रहान् सूर्यादिकान् गुरून् ।
रामचन्द्रात्मजो ब्रूते नृसिंहो जन्मजं फलम् ।।१।।
आदित्ये षट् च वर्षाणि तिथयोऽब्जे कुजे गजाः ।
बौधयेत्यष्टयो मन्दे दिशो गोब्जा गुरौ तथा ।। २ ।।

End :

एकविंशे तु कन्याया जननं माघफाल्गुने ।
शरीरपीडाशान्त्यर्थं देयं तैलं च हीरकम् ।।
क्षीरोदधेः पूर्वकतीरसंस्थः श्रीनन्दिपुर्यां निवसन् ग्रहज्ञः ।
रामात्मजः श्रीनृहरी द्विजाग्र्यस्तेनोदितं जन्मफलं ग्रहाणाम् ।।

Colophon :

इति ग्रहाणां जन्मदशाफलं समाप्तम् ।

Serial No. 395

Daśāphalanirṇaya (MS. No. 75726-b)

Preliminary :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

Beginning :

सूर्यदशाफलं उच्यते । रविदशा जूकादिफलम् ।
देशान्तरे च निजबन्धुवियोगदुःखमुद्योगरोगभयचोरजनेन पीडा ।
पूर्वस्थितस्य सकलस्य जनस्य नाशं स्यात् सर्वदा रविदशागमने भवन्ति ।।

End :

अपमृत्युभयं चैव ज्वरादन्यं तथापकृत् ।
छागादिपञ्चकं दद्यात् सर्वसम्पत्प्रदायकम् ।।
प्रोक्तं दशाफलं वाच्यं सर्वेषां च शुभाशुभम् ।
सौम्य. .शुभं वीक्ष्य पाराशर्यमतं बुधैः ।।

Colophon :

इति दशाफलं पराशरमतं संपूर्णम् ।

Post-colophon :

हरिः ओम् । शुभमस्तु । कान्त(न्ति)मतीसहायम् ।

Serial No. 413

Dūtalakṣaṇa (MS. No. 74051-d)

Beginning :

दूतस्य चेष्टयातः परं वदेल्लक्षणं दिशागम्य ।
ध्वजधूमोऽग्निश्चागणखरमातङ्गवायसाः ।
पूर्वाद्यष्टदशाधीशा दिक्षु प्रागादिषु स्फुटम् ।।

End :

आस्ये कं सद्यमृत्युः करचरधनं पादयोः षट् प्रवासं
वामे हस्ते चतुर्भिर्भयमुदरगतं पञ्च ऋक्षं श्रियं च ।
नेत्रे द्वे प्रीतिलाभं मरणमतिभयं गुह्यके ऋक्षयुग्मं
प्रोक्तं तिस्रे ललाटे विजयति सकलं पट्टबन्धं करोति ।।
वक्त्रेऽग्निः सद्यमृत्युः फणदिशि र—सं पट्टबन्धं अयश्चेत्
पाते चत्वारि पीडा बहुधनसुखं लक्ष्मी हस्त पञ्च वामे(?)।
चीपञ्च(?)जदाज्वरमरणभयं कर्णदेशैकराज्यं
नाभिश्चाष . . . .लक्ष्मी जनयति सुहृदा वाहकेऽन्वङ्गसंख्याः ।।

Serial No. 416

Dṛgganita, Anon. (MS. No. 77319)

Preliminary :

हरिः ओम् । दृग्गणितम् ।

Beginning :

अनूनरथसूर्यो न सोमवाराद्यर्हगणः ।
पुनाकपादैर्नो भानुः मुनिर्धीर्निधिनायकः ।
विभुर्मानी सुरेशो नु रवीन्दूच्चध्रुवा इमे ।।

End :

Tamil gloss.

Serial No. 422

Daivajñabhūṣaṇa by Nṛsiṃha Sūri (MS. No. 68410)

Beginning :

श्रीलक्ष्मीं नमस्कृत्य भास्करं भारतीं गुरुम् ।
अहोबलार्यं पितरं गणेशं च मुहुर्मुहुः ।।
गोत्रेऽस्मिन् कौशिके जातो येन मन्त्राब्धिचन्द्रमाः ।

नृसिंहसूरिः कुरुते दैवज्ञानां सुभूषणम् ।।
काश्यपादिप्रणीतानि मन्वादिस्मृतिवृन्दकम् ।
ब्रह्माण्डानि(दि?) पुराणानि वाराहादिनिबन्धनान् ।।
सिद्धान्तानागमान् कल्पानेतान्यन्यान् मनोहरान् ।
आलोक्य विदुषां प्रीत्यै संग्रहः क्रियतेऽधुना ।।

इह खलु तावद् वेदाङ्गेषु षट्स्वपि ज्योतिषस्य कालज्ञानहेतुत्वेन श्रेष्ठतमत्वात् कालज्ञानाभावे कस्यापि कर्मणः कर्तुमशक्यत्वात् श्रौतस्मार्तादिसकलकर्माचरणयोग्यताहेतुभूतत्वेन सर्वेषामत्यन्तापेक्षणीयं ज्योतिषम् ।

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा स्थितः ।।

इत्यादिश्लोकरूपं परमकारुणिकः परमेश्वरः प्रणिनाय ।

End:

कन्याज्ञ(?)भे प्रक्ष्याळि सिंहमिथुने नक्षत्रराश्योत्तमा(?)
वारा सोमशनिर्ज्ञभृगुजे वेश्मप्रवेशे शुभम् ।।

Colophon : Ends abruptly.

Serial No. 425

Daivajñābharaṇa, Anon. with Anon. Comm. (MS. No. TR 493)

Beginning of Text :

पक्षार्धयोरुदयमस्तमयं प्रकुर्वन्
दक्षान्तयोर्द्युदशरात्रिदर्क(?) पितृणाम् ।
यः शुभ्ररोचिषि लसिति(?)चिरं क्रमान्तो
वाचं ददातु स रविः त्रिजगत्प्रदीपः ।। १ ।।

Beginning of Commentary :

ब्रह्माण्डानि महीमहिम्नपरमे स्वर्णान्यनन्तानि ता-
न्यन्तःसंस्थितकोशभूतनिचयान्यस्मिन् प्रयान्ति कृतिम् (?) ।

स्वल्पं स्वल्पतरं प्रया . . . .नन्दः प्रपश्चाद्भुतं
मायासार्धमनन्तमव्ययमजं वन्दे विभूतिं शिवम् ।।

अथ भूगोलकथनस्य टीका क्रियते । तत्रादौ तावद् ब्रह्माण्डान्तर्वर्तितिमिरसंहारकः स्वजातिसकलनक्षत्रग्रहादीन् प्रकाशयन् वर्तमानो रविः नहीदं(नः वाचं)ददात्वित्याशीर्वादः।

End of Commentary :

सुजलसमुद्रतीरे बडवाग्निजननं कृत्वा चक्रदानान्तकलवणोदकं दक्षिणतीरम् इक्षु-समुद्रादिसमुद्रदक्षिणतीराणि वर्षे दारा(धारा)संपातसंमिश्रं भूगोलस्थितनदीप्रवाहवृद्ध-समुद्रवृद्धिबडवानलः तिष्ठति । महार्णवमध्ये भूवृत्तचतुर्भागान्तस्थितपट्टणचतुष्कं श्लोकेनाह -

भद्राश्वियवकोटि नाम नगरी प्राच्यां ततो लङ्का भारत एव वा ।

. . . . . .

Serial No. 428

Dvādaśabhāvapatiphala by Jayarāma (MS. No. PM 1338)

Preliminary :

श्री गणेशाय नमः । श्रीकृष्णाय नमः ।

Beginning :

अथ श्रीकामधेन्वोक्तं भुवनपतिफलम् ।

त्रिभुवनजननं त्रिलोकदीपं भुवनपालमहाभास्करं प्रणम्य ।
तनुमुखभुवनाधिपे श्रितोऽयं निखिलग्रहेषु फलमथ प्रवक्ष्ये ।। १ ।।

तनुगतस्तनुनायके नराणां तनुभवस्तनुशान्तनप्रभुत्वम् ।
तनुनिजचरणं तनुप्रसावस्तनुविजयस्तनुकं कदापि न स्यात् ।। २ ।।

End :

इत्थं खेचरकौमुदी सुविपुला जाता बुधैर्विस्तृता
वृत्तैर्द्वादशभिर्लसत्स्फुटदलैर्दैवज्ञहस्तोपमा ।
श्रीमद्भट्टतनयेन भट्टजयरामेणोदिता दैववित्
चैनां यो निजकण्ठगां प्रकुरुते भूपाङ्गणे शोभते ।।

Colophon :

इति कामधेन्वोक्तं फलम् । इति द्वादशभावपतिफलं संपूर्णम् ।।

Post-colophon :

शुभं भवतु ।

Serial No. 448

Nakṣatracūḍāmaṇi, Anon. (MS. No. 72500)

Beginning :

हस्त्यश्वबन्धरथयानपुरप्रवेशभैषज्यमन्त्रगृहपार्श्वसुरप्रतिष्ठा ।
यात्राभिषेकमखदीक्षणचौलमौञ्जीः कुर्वन्ति शान्तिकविधानमथाश्विनीषु ।।

चूचे चाला अश्विनी ।

End :

अथवा शस्त्रभयं चत्वारिंशद्वर्षे पञ्चाशद्वर्षे वा अपमृत्युः । अष्टषष्ठिवर्षे महाकण्टकः । अस्मिन् परिहृते सति चतुरशीतिवर्षके किरातबाधा अथवा तीक्ष्णविरकुक्षि(?) भयम् । तत्परिहृते सति नवति वर्षाणि परमायुः । ग्रहप्राबल्याद् उत्तरिष्टानि (?) भवन्ति दुःखत्वात् स्वप्नेऽपि दर्शनम् ।

Post-colophon :

श्री श्रीपराभवसंवत्सरं फल्गुनमा . . . आशि कूचि. . .प्रेंखे प्रेदुनमित्राश्विन नक्षत्रचूडामणि संपूर्णम् ।

Serial No . 463

Narapatijayacaryā by Ādityadeva (MS. No TR 499-a)

Colophon :

इति श्रीराजाधिराजसूर्यवंशान्वय-श्रीसरस्वतीवरप्रसाद-आदित्यदेवविरचित-नरपति-जयचर्या-स्वोदयेषु बलवन्तमहार्णवे चतुरशीतिबन्धाध्यायः चतुर्थः समाप्तः ।।

Most of the Mss. of this work does not give the name of the author, which this Ms. does in the described colophon (p. 66).

Serial No. 465

Navagrahacintāmaṇi, Anon. (MS. No. TR 350-c)

Beginning :

रविप्रश्नफलम् -

अष्टोत्तरशतं बीजमर्धचन्द्राकृतिर्न्यसेत् ।
प्रथमं मध्यमं कृत्वा मध्यमं प्रथमं भवेत् ।।
अन्त्यमन्त्यं भवेच्चैवं सग्रीवश्चाष्टमं भवेत् ।

वसुसंख्याविभागः -

अर्को भानुस्तथा चन्द्रो दृश्यते यदि तत्क्षणात् ।
शक्रतुल्यो भवेद् भोगी सीतवान् पुत्रवान् भवेत् ।।

चन्दनवृक्षं उत्तमोत्तमम् ।

अर्कश्चन्द्रस्तथा भानुर्नश्यते गमनं फलम् ।
स्वस्थाने बन्धुभिः क्लेशः कार्यार्थं च न सिध्यति ।।

Colophon in the Middle :

इति ख्यादिराह्वन्तं रविप्रश्नफलं भवेत् ।
अथ सोमप्रश्नफलम् -
सोमो भानुः रविर्दृष्टः राजवश्यं च लभ्यते ।
अर्थलाभः पुत्रलाभः सर्वकार्यं च सिद्ध्यति ।
रत्नकुम्भं उत्तमम् ।

End :

अथ राहुप्रश्नफलम् -
राहुस्सर्पश्च सौम्यश्च धनलाभो भवेद् बहु ।
गमने राजपूजा च स्वर्णकुम्भप्रदर्शनात् ।
स्वर्णकुम्भम् उत्तमम् ।

Colophon :

इति नवग्रहचिन्तामणिः समाप्तः ।

Serial No. 479

Nāradapraśna by Nārada (MS. No. 72648)

Margin :

द्वारप्रश्नम् ।

Beginning :

गर्भद्वारबाह्यप्रश्नम् -

मुष्टिचिन्तनवेलायां द्वारे बाह्ये च दक्षिणे ।
बाह्यभेद(?) वामहस्ते तु वस्तुहस्तं विनिर्दिशेत् ।।

End :

केतवेन्दुसमायुक्तो हंसभं गणयेद् बुधः ।
सौभाग्यं सौम्यवैद्येन दौर्भाग्यं दुष्टवेधसोः ।।

Serial No. 484

Niryāṇanirṇaya Anon. (MS. No. 71203-c)

Preliminary :

ओम् ।

Beginning :

कृताग्निहोत्रमासीनं ब्रह्माणं लोकपूजितम् ।
विनयेनोपसंगम्य देवेन्द्रः पर्यपृच्छत ।। १ ।।

देवदेव सुरश्रेष्ठ मानुषाश्च कथं भुवि ।
ऊर्ध्वलोकं गमिष्यन्ति श्रोतुमिच्छामि तत्त्वतः ।। २ ।।

साधु साधु महाभाग यन्मां त्वं पर्यपृच्छसि ।
तत्सर्वं कथयिष्यामि निर्याणं चैव जातकम् ।। ३ ।।

ग्रहभाववशात् सर्वं स्त्रीणां पुंसां तथैव च ।
भास्करादिग्रहाः सर्वे निर्याणं च पृथक् पृथक् ।। ४ ।।

स्थानानि बलसंपन्नगुणनीचप्रयन्ततः ।
निर्याणं कथयिष्यामि अष्टोत्तरशतक्रमात् ।। ५ ।।

End :

जीवेत् . . . स वर्षाणि षष्टिवर्षाणि संख्यया ।
आषाढे शुक्लपक्षे च रोहिण्यां नवमीतिथौ ।।
सोमवारे च पूर्वाह्ने स्वगृहे बन्धुसङ्गते ।
तत्काले ज्ञानमरणं योगमार्गे तनुं त्यजेत् ।।

Colophon :

इति बृहस्पतिसंग्रहे निर्याणनिर्णयं समाप्तम् ।

Serial No. 490

Pañcapakṣiśāstra, Anon. (MS. No. 72804)

Beginning :

नमस्कृत्वा महादेवं गुरुं शास्त्रविशारदम् ।
भविष्यदर्थबोधाय वक्ष्येऽहं पञ्चपक्षिणम् ।।
अनेकशास्त्रसारेण लोककालत्रयं प्रति ।
फलाफलानि दृश्यन्ते सर्वकार्येषु संस्थितः ।।

End :

ईशान्ये पश्चिमाग्नेये बन्धुकार्यं विचिन्तयेत् ।
उत्तरे दक्षिणे चैव शत्रुकार्यं विनिर्दिशेत् ।।
अक्षरा दिग् विचेष्टा च तस्य दूतस्य लक्षणम् ।।
इत्यर्थलाभं गगने प्रयाणं राज्यश्रियं सुस्थिरतीव दुःखम् ।
मृतिर्विवादे बहुधा भवन्ति महीतले क्षियः . . . .(?)

Colophon :

हरिः ओम् । इति पक्षिज्योत्स्यम् ।

Serial No. 492

Pañcapakṣiśāstra from Jātakaratnākara (MS. No. PM 1340)

Preliminary :

श्री गणेशाय नमः ।

Beginning :

नत्वा विघ्नेश्वरं वाणीं पञ्चपक्षिनिदर्शनम् ।
पुरागस्त्येन देवेभ्यः प्रोक्तं संक्षिप्यते मया ।। १ ।।
भेरण्डकचकोराख्यकाककुक्कुटकेकिनः ।
श्वेतपीतारुणश्यामनीलाः स्युः पञ्चपक्षिणः ।। २ ।।

End :

यद्यर्धमरणं ज्ञेयं यामान्तर्मुक्तिलक्षणम् ।
श्येनादिखगतो ज्ञेया नन्दाभद्राजयादिकाः ।। ४४ ।।
अश्विन्यादिकभेशाश्च मेरात शश(?)निर्मिताः ।
प्रश्नशास्त्रमिदं प्रोक्तं समासेन तपोधन ।। ४६ ।।
ग्रहराशिस्वभावानां ज्ञापकं पक्षिसंज्ञया ।
एतच्छास्त्रं नास्तिकाय पठनाय जपेत्तथा ।। ४६ ।।
न वक्तव्यं न वक्त्व्यं न वक्तव्यं कदाचन ।
इदं शास्त्रं महार्थं तु ज्ञेयं गुरुमुखात् किल ।। ४७ ।।
प्रीत्यागस्त्य तव प्रोक्तं रहस्यं रक्ष्यतां त्वया ।
एकैकस्य तु सूत्रस्य सन्त्यर्था बहवोऽत्र हि ।। ४८ ।।
एवमुक्त्वा महार्थं तु स्कन्दस्तत्र जगाम ह ।

ईश्वर उवाच -

शास्त्रस्य गुरवो ह्येते शिवगौर्यौ च तत्सुतः ।। ४९ ।।
षण्मुखः कुम्भजन्मा च स्मर्तव्यास्तदुपक्रमे ।
एतच्छास्त्रं स्कन्दभक्त्या स्कन्दव्रतकृतेन च ।। ५०।।
सिद्धिर्भवति सर्वेषां नान्यथा शिवभाषितम् ।
पारिजाताख्यशास्त्रेऽस्मिन् खण्डे रत्नाकराभिधे ।।
प्रश्नशास्त्रमिदं प्रोक्तं चतुर्थाध्यायसंज्ञितम् ।। ५१ ।।

Colophon :

इति जातकरत्नाकरे पञ्चपक्षिनिरूपणं चतुर्थोऽध्यायः ।

Post-colophon:

श्रीमच्छंकरनाथकृपया सुब्रह्मण्येन लिखितम् । श्रीनाटकरोपनामकलक्ष्मणभट्टात्मजविष्णुना लिखितम् ।

Serial No. 493

Pañcapakṣiśāstra or Narapativijaya spoken by Skanda (MS. No. 72803)

Beginning :

सूतं सुखासनासीनं लोकानां हितकाम्यया ।
पप्रच्छुः मुनयस्सर्वे कौतूहलसमन्विताः ।।
भूतभव्यादिजन्मानं केनोपायेन लभ्यते ।
तदुपायं वद श्रीमन् संक्षिप्तं च महार्थकम् ।।
श्रुणुष्व मुनयः सर्वे प्रश्नशास्त्रमनुक्रमम् ।
भूतादिकालदफलं स्कन्दप्रोक्तं महार्थकम् ।।
पार्वतीतनयः श्रीमान् सर्वलोकहिते रतः ।
कालत्रयोद्भवफलज्ञानशास्त्रं वदस्व मे ।।
पितरं भ्रातरं नत्वा गणेशं लोकपूजितम् ।
वक्ष्ये स्वराश्रितं शास्त्रं पञ्चपक्षिनिदर्शनम् ।।
भेरण्डकश्चकोराख्यः काककुक्कुटकेकिनः ।
श्वेतपीतारुणश्यामनीलाः स्युः पञ्चपक्षिणाम् ।।

End :

इदं शास्त्रं महार्घं तु ज्ञेयं गुरुमुखात् किल ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।।
प्रीत्यागस्त्य तव प्रोक्तं रहस्यं रक्ष्यतां त्वया ।
पारिजातं स्वशास्त्रेऽस्मिन् खण्डे रत्नाकराभिधे ।।
प्रश्नशास्त्रमिदं प्रोक्तं चतुर्थाऽध्यायसंज्ञकम् ।।
विविधविबुधयज्यां भारतीं वेष्टचमानः

प्रचुरचतुरभावं दातुकामः स्वरेभ्यः ।
नरपतिरिति लोके ख्यातनामा हयास्ये
नरपतिविजयाख्यं मामकं शास्त्रमेतत् ।।

Colophon : Nil

Post-colophon :

हरिः ओम् ।

Serial No. 626

Pañcāṅgagaṇitam with Anon. Comm. (MS. No. 77515)

Beginning :

षष्टिधीरहतास्तासु प्रभवादिगताब्दकम् ।
धवाङ्गं च क्रमात् प्रोज्झ्य शालिवाहनवत्सरः ।।
सोऽयं धीसीकालयुतः गतकल्यब्दको भवेत् ।
कल्यब्दो मातुलगुणो वर्षवांशेन संयुतः ।।
पुनरब्दान्मानगुणान् सालप्रियविवर्जितान् ।
तत्समेन हरेल्लब्धं फलं तस्मिन्नियोजयेत् ।।
शेषं षष्ट्या हृतं तेन लब्धं तु तदधो न्यसेत् ।
एवं मुहुः कृते ह्यत्र त्रिधा शुद्धत्वमेति च ।।
शुक्रवारादिकं ज्ञेयं गम्यवारं दिनात् तथा ।
शुद्धाहं सप्तभिर्हृत्वा मेषसंक्रमणध्रुवम् ।।

Beginning of Commentary :

षष्टिरिति । षष्टि यस्मिन् प्रभवादौ च चतुर्विंशत्या संगुण्य अतीतप्रभवविभवादिगताब्दान् तस्मिन् संयोज्य पुनः धवाङ्ग इति कटपयादिसंख्यया नवचत्वारिंशदधिकशतसंख्यास्संयोज्य शालिवाहनशकाब्दा भवन्ति ।

End of Commentary :

ईशान्यमोक्षः दक्षिणगोळं चेत् निर्ऋतिस्पर्शः आग्नेये मोक्षः ।।

Colophon: Nil

Post-colophon :

कान्तिमतिसहायम् ।

Serial No. 634

Parahitaganitam, Anon. (MS. No. 70354)

Beginning :

षष्टिस्त्रयोविंशतिगुणितं व्यपगतसंवत्सरेण संयुक्तम् ।
नववेदाग्निसंयुक्तं शककालं विजानीयात् ।। १ ।।
धूसीकालयुतं वर्षं कल्यब्दमिति कथ्यते ।
कल्यब्दो मातुलगुणो वर्षवांशेन संयुतम् ।। २ ।।
पुनरब्दान् मानगुणान् सालप्रियविवर्जितान् ।
तत्समाप्तदिनैर्युक्तं शुक्रवारादिकं दिनम् ।। ३ ।।
शेषं षष्ट्या हृतं तेन लब्धा नाडीविनाडिकाः ।
वेदोत्थज्ञानकृष्टीनदिवसान् रसगौरिकैः ।। ४ ।।
कालानलैर्देवरैश्च शिष्टं वाक्यं शशाङ्कजम् ।

.....

गीर्नः श्रेयः धेनवः श्रीः । रुद्रस्तु नम्यः ।। भवेत् सुखम् ।

दशकम्-

दश धीरो जलं सालः क्षीरं गोर्हानयेचनि ।

End :

कक्ष्या..... घटीमानं विषमानेन ताडयेत् ।
षष्टीविभाजितं लब्धं पूर्वकक्षेण योजयेत् ।।

Colophon : Nil

Serial No. 636

Parahitaganitam Anon. (MS. No. 77542-a)

Beginning :

अष्टाविंशतिगुणिता षष्टिर्गतवत्सरैश्च संयुक्ता ।
निधिवेदैश्च समेता शकनृपकालप्रमाणं स्यात् ।।
धीसत्कालसमेता तत् कल्यादिप्रमाणमेवं स्यात् ।
मातुलगुणितानब्दानब्दतुर्यांशसंयुतान् कृत्वा ।।

पुनरपि कल्यब्देभ्यो मानहतेभ्यस्सुलेखया रहितेभ्यः ।
तत्समलब्धैस्सहितान् दिवसान् वीक्षेत शुक्रवारादीन् ।।
शेषाः षष्टिहतास्तल्लब्धा नाड्यो विनाडिकाद्याः स्युः ।
श्रीर्गुणमित्रादीनां वाक्यानां वत्सरध्रुवं तत् स्यात् ।।

End : Miscellaneous matters including Time tables, Dṛgganita tract, etc.

Serial No. 643

Pallīvidhānam by Garga (MS. No. PM 1313-z-55)

Beginning :

अथ पल्लीविधानम् -

अथातः संप्रवक्ष्यामि श्रृणु शौनक यत्नतः ।
पल्ल्याः प्रपतनं चैव शरटस्य प्ररोहणम् ।।१।।

End :

तस्यायुर्विजयो लक्ष्मीः कीर्तिर्वृद्धिश्च जायते ।
पल्ल्याः शरटयोः शान्तिर्विधानं सर्वजन्तुषु ।
ऋषिभिः सुकरं प्रोक्तं गर्गेणैव सुधीमता ।।

Colophon :

इति गर्गप्रोक्तं पल्लीशरटयोः शान्तिविधानं समाप्तम् ।।

Post-Colophon :

कपोतपल्लीकृकलासकाका मूर्ध्नि स्थिताः स्युर्निधनाय नूनम् ।
वासांसि दद्यात् द्विजपुंगवेभ्यः स्नानं कृतं तत्क्षणमेव शुद्धम् ।।

श्रीरस्तु । लिखितं पल्लीविधानं च ।

Serial No. 646

Pādacāragaṇanam, Anon. (MS. No. 75535)

Preliminary :

श्रीदक्षिणामूर्तये नमः ।

Beginning :

दिने संशुद्धवाक्यानामन्यो गीर्न धनं ततः ।
ध्रुवं मिथश्शुद्धशेषाद् वनं शुक्रस्य पञ्चमे ।।
अत्याहूतं(?).....कम् ।
तस्मिन्नेष्यद्वाक्यगतसंख्या यावद् गमिष्यति ।।
तद्वाक्यं प्रथमं कुर्याद् द्वितीयं तदनन्तरम् ।
तयोर्वर्णध्रुवैर्हत्वा युञ्ज्यात् साम्ये.... ।।

End :

यदाधिका तदा लब्धफले संशोधयेद् गतिम् ।
तदा वक्रं विजानीयाद् ग्रहाणामुक्तमार्गतः ।।
रामक्षितीशैर्युगवेदचन्द्रैस्स्वराक्षिभूमिर्जलभूमिपालैः ।
नेत्रेषु रूपैः क्षितिजा .... ।।

Colophon : Nil.

Serial No. 656

Praśnajñānam by Brahmārka (MS. No. PM 1313-z65)

Preliminary :

श्री गणेशाय नमः ।

Beginning :

ब्रह्माणं कमलापतिं गिरिसुतानाथं गणेशं गिरं
सूर्यादिग्रहमण्डलं च पितरं नत्वाथ मोक्षेश्वरम् ।
वालभ्यान्वयसंभवो गणितवित् प्रोद्दामविद्यार्थवित्
प्रश्नज्ञानमनुत्तमं प्रकुरुते ब्रह्मार्कनामा कविः ।। १ ।।
यस्मिन् काले दिवसनिशयोः प्रश्नको यच्च पृच्छेत्
तस्माल्लग्नं गणितकुशलैश्छायया तोययन्त्रैः ।
स्पष्टं कार्यं जननसमये प्रश्नकाले विवाहे
लग्नात् खेटादशुभशुभदं प्रोच्यते तत्फलं च ।। २ ।।

End :

मीने मानववाहिनी मुकुन्दमुण?)सर्पणम् ।
जलपानं समाधाय हृदि धृत्वा मुकुन्दवत् ।।

Colophon :

इति ब्रह्मार्कविरचिते प्रश्नज्ञाने चित्तचिताध्यायः ।।

Post-colophon :

शुभं भवतु । श्रीरस्तु । संवत् १७४५ । वर्षे शुदि १ बुधे रुद्रजितेन लिखितं परोपकाराय ।। श्रीः ।।

Serial No. 658

Praśnadīpikā with Comm. by Jambūnātha (MS. No. 73203)

Preliminary :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

Beginning :

अस्तोकन्यस्तविन्यस्तनिस्तुलस्तुत्यगोस्तनम् ।
हस्तन्यस्तशुकं वस्तु ध्वस्तांहस्तोकमस्तु वः ।।
नमस्कृत्य गणेशानं ख.....दीपकम् ।
जम्बूनाथो रचयति सटीकां प्रश्नदीपिकाम् ।।
नवर्क्षपादादेषास्माद् गुणकर्मस.....लैः ।
चन्द्राद्याः क्रूरसौम्याद्याः द्रेक्काणा सजपन्नपाः (?) ।।

End : Broken.

Serial No. 659

Praśnanidhi by Jayadeva (MS. No. PM 1341)

Preliminary :

श्री गणेशाय नमः ।

Beginning :

नत्वा श्रीभुवनेश्वरीं गणपतिं ब्रह्मादिदेवान् गुरून्
कुर्वे प्रश्नविधिं(निधिं?) विलोक्य मिहिरब्रह्मार्कमुख्यैः कृतान् ।
प्रष्टा सार्थकरः प्रयुज्य गणकान् पृच्छेत् स्वकार्यं सकृत्
दैवज्ञोऽपि वदेद् विलोक्य सदसल्लग्नग्रहाणां बलम् ।। १ ।।

End :

रेखामध्यगतात् सुगुल्फनगराद् द्वात्रिंशकैर्योजनैः
प्रत्यक् स्यन्तपनीतटाच्छिवदिशि क्रोशत्रयं यत् स्थितम् ।
श्रीमच्छ्रीपुरमारप्रियतमं (?) तत्राभवद्वेदवित्
जह्नु(?)विप्रवरस्तदीयतनयो गोविन्दनामाभवत् ।।
तत्पुत्रो धरणीसुरोचितकरो द्वारेश्वरो भूसुरो
भूपालकृपालसत्पृथुयशा श्रीप्रीतिसेवारतः ।
तत्सूनुर्जयदेवनाम अकरोत् प्रश्ननिधिं वै क्रमात्
भूरामाद्रिपिताक इमे(?) माघाश्रितेऽर्के कुजे ।।

Colophon :

इति श्रीमद् द्वारेश्वरात्मजजयदेवदैवज्ञविरचितः प्रश्ननिधिः समाप्तः ।।

Post-colophon :

श्रीः । श्रीरस्तु । कल्याणमस्तु ।।

Serial No. 673

Praśnādarśa, Anon. (MS. No. 75646)

Preliminary :

श्रीगणेशाय नमः ।

Beginning :

निरञ्जनं निराकारं शुद्धविज्ञानभाजनम् ।

नित्यज्ञानानन्दघनं तमहं समुपास्महे ।। १ ।।
यस्यैव शक्तिर्वाग्देवी जगदानन्दसाक्षिणी ।
तां देवीं शिरसा नित्यमुपासे वाचक(वाचन ?)श्रियै ।। २ ।।
सनन्द्ययं सुधावासशेखरः परमेश्वरः ।
उद्घाट्य योगकलया वाणीं दिशतु शाश्वतीम् ।। ३ ।।
प्रश्नादर्शमिदं वक्ष्ये किंचित् .. संप्रकीर्तिदम् ।
परमेशादुपालब्धं लोकानुग्रहकांक्षया ।। ४ ।।
धातुमूलं जीव इति त्रयो भेदाः प्रकीर्तिताः ।
वक्तुं तेषां भिदां लोके ब्रह्मापि न ..शक्तिमान् ।। ५ ।।
मेषाद्या राशयः प्रोक्ता द्वादशैव क्रमेण हि ।
तेषामधीशान् पूर्वोक्तशास्त्रमार्गेण योजयेत् ।। ६ ।।

End :

एवमाप्तस्य लग्नस्य शरीराङ्गानि वक्ष्यते ।
लग्नं शिरश्च कर्णौ च नासा गण्डं हनुर्मुखम् ।।
इति पूर्वाङ्गमेतत् स्यादपराङ्गमथोच्यते ।
ग्रीवाङ्गसभुजौ पार्श्वे कटिश्च पृष्ठो हृदोदरे ।।

Colophon : Nil

Serial No. 675

Phalakalpalatā, Anon. (MS. No. PM 1313-z 62)

Preliminary :

श्रीगणेशाय नमः।

Beginning :

कमलया कलितं कमलापतिं विजितमम्बिकया शशिशेखरम् ।
सुरवरेण नुतां च विधेः सुतां गणपतिं हतविघ्नततिं भजे ।। १ ।।
निखिलवार्षिकलग्नगता ग्रहा हितसमस्तफलप्रतिपादिका ।
परिकलिज्य तदादिमजातकं विरचये फलकल्पलतामहम् ।। २ ।।
अथ रविफलम् -३-२४ इति रविफलम् ।

अथ चन्द्रफलम् -१-१२ इति चन्द्रफलम् ।

अथ भौम.... इति केतुफलं च ।

End :

अथ मुन्थाफलम्-

मुन्था रथांबरविभूषणलाभकारी ।

Colophon :

इति मुन्थाफलं फलकल्पलतायां च ।

Post-colophon :

संवत् १७४६ शाके १६१२(?) मागशीर्षे वदि १४ शनौ वटपत्तने रुद्रजितेन पुस्तकम् ॥ करकृतमपराधं क्षान्तुमर्हन्ति सन्तः । अथ आगामिसंवत्सर ब्रेसाडुवानो श्लोकः ।

रसेषुतिथ्योन १५५६ शकोऽष्टभूयुक्संवत्सरः स्यात् खलु षष्टिशेषः ।
दिनैश्चतुर्भिर्मुनिनाडिकाद्यैरष्टाहतैः खाष्टिघटीविहीनैः ॥
विवर्जितो वृश्चिकसंक्रमः स्यादभीष्टसंवत्सरवेशनं च ॥

Serial No. 684

Phalaratnamālikā, Anon. (MS. No. 67916-b)

Beginning :

अरुणतरतनुप्रभाभिरूढां दिवमपि पिञ्जरितां सदा धरन्तीम् ।
जलरुहभवपत्नी सेह तामिष्टसिद्ध्यै प्रतिदिवसमुपासे प्रेयसीमिन्दुमौलेः ॥
अनिवरकृतहोराकाननेषु स्वभुक्त्याप्यगदितविलधि त्वां प्राप्तसौख्यं मनुष्यः ।
स्फुटतरफलरत्नैर्भूषयन् कण्ठदेशे जयति जगति विद्याभूषणः कृष्णमिश्रः ॥
कृष्णीयतः प्रश्नविधिं पुरैव कृता हि विद्वत्कुलशर्महेतोः ।
मुहूर्तकण्ठाभरणाभिधेयो हृद्यं च सद्भिस्समुपासनीयम् ॥
तत्त्वं पुनर्ज्योतिषरत्नमालां फलार्थिनां जातककाननेषु ।
सर्वत्र पीयूषसमं महेशे वरोपलब्धं तपसोऽधिकेन ॥
विहाय सद्भिर्न गुरूपदेशं न चिन्तनीयं खलु शास्त्रमेतत् ।
गोप्तव्यमेतद् विबुधैः प्रयत्नादित्याह शंभुर्भगवान् महेशः॥

End : Breaks off in the middle of ch. V.

Serial No. 709

Bṛhajjātaka with Comm. Subodhinī (MS. No. 71720)

Beginning of Commentary :

अस्मायते वासरपोऽखिलानां मार्गायते जन्मविवर्जितानाम् ।
दीपायते यो जगतामभीष्टं ददातु नस्सोऽन्यतरानपेक्षम् ।।
होरा रचिता वराहमिहिराचार्येण नानार्थिनी
तस्या मद्गुरुदेवताननसरोजान्मत्प्रसादागतम् ।
एकार्थं परिहृत्य तस्य रचये टीकां सुबोधार्थिनीं
मादृक् मन्दधियामनुग्रहकृते लोकोपकाराय च ।।

अथाचार्येणास्य शास्त्रस्य अविघ्नेन परिसमाप्त्यर्थम् आदिमेन श्लोकेन इष्टदेवतानमस्कारः क्रियते -

Beginning of Text :

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मना-
मात्मेत्यात्मविदां क्रतूंश्च यजतां भर्तामरज्योतिषाम् ।
लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नस्स ददातु नैककिरणस्त्रैलोक्यदीपो हरिः ।।

Commentary :

मूर्तित्वे परिकल्पितः पर्यवस्थापितः ।

Colophon :

इति वराहमिहिराचार्यकृतौ होराशास्त्रे आयुःक्षयाध्यायः सप्तमः ।।

Post-colophon :

हरिः ।

Serial No. 715

Bhārgavasūtra by Bhṛgu (MS. No. 75726-a)

Beginning :

अथ भृगुसूत्रभावफलम् -

लग्ने रविः - आरोग्यं भवति, पित्तप्रकृतिः, नेत्ररोगी, मेधावी, सदाचारवान्, उष्णदेही, मूर्खः, पुत्रहीनः, तीक्ष्णबुद्धिः, अल्पभाषी, प्रवासशीलः, सुखी ।

स्वोच्चे - कीर्तिमान्, बली, क्रुरेक्षणः, विद्वान् । नीचे- प्रतापवान्, जनद्वेषी । सिंहे- वंशनाशः । कुलीरे - ज्ञानी, योगी ।

End :

सलाभे पुत्रवृद्धिः धनधान्यवृद्धिः ।.... ये अल्पपुत्रः पापभीरुः शुभयुतः न दोषः ।

Colophon :

इत्युपदेशे भार्गवसूत्रे भाध्याये अष्टमोऽध्यायः ।।

Post-colophon :

हरिः ओम् । शुभमस्तु । भृगुसूत्रं समाप्तम् ।
उला कान्तिमती सहायम् ।।

Serial No. 720

Bhāvaphalādhyāya, Anon. (MS. No. TR 501-a)

Beginning :

अथ भावफलाध्यायः प्रारभ्यते । तत्र भावफलं प्रारभ्यते ।
सूर्योदये -
न शान्तो नातिसुतो निर्घृणोऽतिरणश्लाघी ।
विकलेक्षणोऽल्पभाषी प्रवासशीलो भवेत् सुखी जातः ।।

End :

अनुक्ताः स्वल्पदोषाः स्युः विद्युन्नीहारवृष्टयः ।

पत्यर्कपरिवेषेन्द्रचापांशुबु(भू?)धरगर्जनाः ।।
लत्तोपग्रहपातास्या मासदग्धाह्वया तिथिः ।
लग्नदग्धान्धकाणाख्यपङ्गुसंज्ञाश्च राशयः ।
एवमाद्यास्तमस्तेषां व्यवस्था क्रियतेऽधुना ।।
इति फलाध्यायः ।

Colophon :

इति भट्टविट्ठलविरचितीयां षट्पञ्चशिका होराशास्त्रप्रवृत्तौ भावफलाध्याये द्वितीयोऽध्यायः समाप्तः ।

Serial No. 727

Bhūgolanirṇaya by Vedāntadeśika with Com. (MS. No. 71914)

Preliminary :

शुभमस्तु । ओम् । वेदान्ताचार्य भूको(गो)ळम् ।
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।

Beginning of Text :

भुवनकोशसंख्या निरणैषुराचार्याः-
पञ्चाशत्कोटिभिः स्यान्मितमवनितलं योजनानां तथा हि
स्याज्जम्बूद्वीपमेकं निगतमुदधिना तावता वेष्टितं तत् ।
प्लक्षद्वीपेन सोऽपि द्विगुणवितातिना तावतेष्वब्धिनासौ
द्वीपा द्वैगुण्यभाजः स्वसदृगुदधिभिः संवृता एवमेव ।।

Beginning of Commentary :

लक्षं तावता एकलगसंख्यात्मकेन सोऽपि जम्बूद्वीपोऽपि । पुन्नपुंसकम् । द्विगुणवितातिना द्विलक्षविस्तारेण प्लक्षद्वीपेन । वेष्टित इत्यर्थः । तावता द्विलक्षसंख्यकेन असौ प्लक्षद्वीपः वेष्टितः । एवं प्लक्षद्वीपवत् शाल्मल्यादिद्वीपा पञ्चापि उत्तरोत्तरं द्वैगुण्यभाजः । स्वस्वद्विगुन्नतिभिः स्वस्वविस्तारसदृशसंरा(?)दिसमुद्रैस्संवृताश्च तावन्तीत्यर्थः ।
समासेनोक्तान् द्वीपान् विशेषयति-

Text :

जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करास्याः द्वीपाः ।
लवणेक्षुसुरासर्पिदधिदुग्धाम्भः संवृताः क्रमशः ।।

Com.

स्पष्टोऽर्थः ।

End of Commentary :

अवान्तराब्धिसर्वे विष्णुपुराणादिषु द्रष्टव्याः । दशगुणितेति अण्डभित्तिपरिमाणमारभ्य पूर्वपूर्वापेक्षया उत्तरोत्तरदशगुणितमित्यर्थः । एवं वेदान्ताचार्येण कृतम् ।

Colophon :

इति भूको(गो)ऊनिर्णयस्समाप्तः ।

Post-colophon :

हरिः ओम् । वर्षाणि किलाद्यपश्चिमद्वीपांशाः । वर्षशद्वतिषु च निर्वचनम् । यवद्वीपादिवृत्तिः वा तत्समम् । स्वराणी(?) य(व)द्वीपतुल्यविस्तारः यथा तथा आवृताः । सहस्रमेव सहस्रम् । अशीतिरेवाशीतिः योजनानां चतुरधिकाशीतिः विंशत्या चतुरः —ता या चतुष्करो दण्डः ।
Verse 51 of the Golapāda of *Āryabhaṭīya* is given at the close.

Serial No. 731

Mātṛkāpraśna, Anon. (MS. No. PM 1343)

Preliminary :

श्रीगणपतये नमः ।

Beginning :

अकारे विजयं विद्या(त्) धनप्राप्तिस्तथैव च ।
सिंही च सर्वकार्याणि पुत्रलाभस्तथा ध्रुवम् ।। १ ।।
आकारे शोकसंप्राप्तिः विरोधः सर्वजन्तुषु ।
आवर्तसंभविव्याधिर्दुःखं चैव न संशयः ।। २ ।।

End :

क्षकारे लभते ज्ञानं दैवज्ञं बुद्धिदं भवेत् ।
सर्वसौख्यं भवेत् कार्यं शोभनं च भविष्यति ।। ५१ ।।
रचिता प्रश्नैकपञ्चाशत् समाप्ता चैव शोभिना ।
ये पृच्छन्ति नराः सर्वे सन्तुष्टाश्च सदैव ते ।।

Colophon :

इति मातृकाप्रश्नः ।

Post-colophon :

शाके २१ क्रोधीनाम संवत् ज्येष्ठ शुद्धत्रयोदशी मन्दवारे इदं पुस्तकं अनन्तभट्टपट्टवर्धनस्य अक्षरहस्त । स्वार्थं परार्थं च । ॐ नमो शिवाय सीधंयनम् (?) ।।

Serial No. 734

Muhūrtakaṇṭhābharaṇam by Kṛṣṇamiśra (MS. No. 72163)

Beginning :

गोपालबालावलमानक(न्त) हेमाचलावासभुवस्सधोराः(?) ।
भूयासुरायासहरा मुरारे रतान्तराले भवतां.....।। १ ।।
अथाभियास्ये मुनिभिः प्रणीतज्योतिर्विदां सौख्यकरः प्रबन्धः
ज्ञात्वा भवेत् सर्वसभासु पूज्यं मालेव कण्ठाभरणेन विद्वान् ।। २ ।।
...प्रसादादुपलब्धमेतच्छास्त्रं रहस्यं समुपासनीयम् ।
कृष्णेन कृष्णाङ्घ्रिसरोजराज्यनरं नयारा भ्रमराचिते(न) ।। ३ ।।
अज्ञातकर्मसमयस्य .... रस्य लोके वक्तुं शुभाशुभफलानि मुहूर्तरीत्या ।
वक्ष्ये रहस्यतरमद्भुतमानुपूर्व्यासौख्यप्र....ममुं विदुषां सुखाय ।। ४ ।।
अथ वक्ष्ये मुहूर्तानां निर्णयं शास्त्रसम्मतम् ।
फलादि च रहस्यानि निश्चयेन मुनिभिरीरितम् (मुनीरितम् ?) ।। ५ ।।

End :

सर्वथात्र परित्याज्यं(?ज्यः) सद्यो मरणलक्षितः ।
मुहूर्तान्तवर्जितं लग्नं बुद्धिमद्भिस्सदा नरैः ।। ६ ।।

Colophon :

इति श्रीकृष्णमिश्रकृतौ मुहूर्तकण्ठाभरणे सप्तमोऽध्यायः ।

Post-Colophon :

हरिः ओम् ।

Serial No. 749

Muhūrtapadavī of Puruṣottama with Com. Muhūrtasaraṇīdīpa (MS. No. 72178)

Beginning of Commentary :

नमामि विघ्नराजं तं विघ्नराजिनिकृत्तये ।
यस्य स्मरणमात्रेण सर्वे निर्विघ्नतां ययुः ।।

मुहूर्तसरणीदीपं सर्वसंशयनाशनम् ।
व्यख्यानं लिखितुं यत्नं करोमि जनरञ्जनम् ।।

Beginning of Text :

प्रत्यूहप्रतिहन्तारं प्रणिपत्य गणाधिपम् ।
मुहूर्तावगमे मार्गं ऋजूकर्तुं यतामहे ।।
उल्कोर्वीचलनोपरागगुलिकाः षष्ठाष्टमान्त्येन्द्रसद्-
दृष्टारूढविमुक्तराशिसितदृक्सायाह्नसन्ध्यादयः ।
गण्डान्तोष्णविषं स्थिरं च करणं रिक्ताष्टमीविष्टयो
लाटैकार्गलवैधृताहिशिरसः सर्वत्र वर्ज्या अमी ।।

Commentary :

उल्केति अलातपत्रम् ।

End of Text :

कुम्भपूर्तितिथिभाम्बुचन्द्रमो वृद्धिरिःफरिपुचन्द्रमन्ददृक् ।
धान्यवृद्धिशुभदं न कृत्तिका शक्रनक्रवणिगाद्यराशयः ।।

End of Commentary :

तिथिनक्षत्रवृद्धिः शुक्लपक्षचन्द्रः अम्बुवृद्धिः वेलियेत्तम् । एतेषां योगः कुम्भपूर्तिः । द्वादशषष्ठचन्द्रः पूज्यः । शनिदृक् सक्(?) अयुक्तानाह कृत्तिका ज्येष्ठा वा अनिष्टा । मकरतुलादिशेषाः अयुक्ताः । ष्अपरपक्षत्रयोदशी श्रेष्ठा । गुळिकोदयमपि युक्तम् । एवं विचार्य कार्यः ।

Colophon :

मुहूर्तपदवीव्याख्या सम्पूर्णम् ।

Post-Colophon :

हरिः ओम् ।

followed by 3 vv. on Muhūrta.

Serial No. 753

Muhūrtapadavīvyākhyā Varadīpikā by Parameśvara (MS. No. TR 500)

Preliminary :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः । श्रीनारायणाय नमः ।

Beginning of Commentary :

श्रीमद्गुरोश्चरणमाश्रितकामपूरं व्यासं गणेश्वरगुहावपि वागधीशम् ।
सिद्धान्तपञ्चककृतोऽर्कमुखान् ग्रहांश्च त्रेधापि नौमि वचसाममलत्वसिद्ध्यै ।।१।।
पूर्वैः कृतानि विविधानि मुहूर्तशास्त्रा-
ण्यालोक्य सज्जनसमाचरितांश्च मार्गान् ।
ज्ञात्वा गुरोः करुणया वरदीपिकाख्यो
कुर्वे मुहूर्तपदवीविवृतिं स्फुटार्थाम् ।। २ ।।

इह खलु महावास्तुपुरसम्भवो महीसुरेन्द्रः सकलमुहूर्तशास्त्रार्थतत्त्वविद् अखिलजनोपकाराय अभिनवां मुहूर्तपदवीं करिष्यन् अविघ्नपरिसमाप्त्यर्थम् इष्टदेवतां नमस्कृत्य चिकीर्षितं प्रतिजानीते - प्रत्यूहेति । प्रत्यूहप्रतिहन्तारं गणाधिपं प्रणिपत्य मुहूर्तावगमे ऋजुं मार्गं कर्तुं यतामहे इति योजना ।

End :

रिक्ताष्टमे विष्टिहीनास्थितयः शुभराशयः । शुभोदये कर्म कुर्यात् सर्वं भवति वः शिवम् ।।

Colophon :

इति वरदीपिकाख्या मुहूर्तपदवीव्याख्या समाप्ता ।

कञ्जपुरद्विजवर्यस्वस्रियेणाग्निदत्तशिष्येण ।
पुरदहनपुरभवेन व्याख्या परमेश्वरेण रचितेयम् ।।
शुभमस्तु ।
लोकानामुपकाराय निर्देशेन गुरोर्मया ।
व्याख्या सुमेधसा यत्नात् कृतेयं वरदीपिका ।।
व्याख्या सुमेधसा यत्नात् (१७९५७) इति व्याख्यारचनावसालकलिः ।

Post-colophon:

ओं तत्सत् । ए. नारायणशर्मणा लिखितम् ।

Serial No. 754

Muhūrtapārijāta, Anon. (MS.No. 75941)

Preliminary :

श्री गुरुभ्यो नमः । मुहूर्तपारिजातं मूलम् ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।।

Beginning :

इन्द्रादिसर्वामरबृन्दवन्दितं वन्दारुचिन्तामणिमिन्दुशेखरम् ।
देवं गणेशं प्रणिपत्य चेतसा वक्ष्ये निषेकादिनिधानपद्धतिम् ।।
श्रुतजनहृदयारविन्दगे श्रीगुरुमयं सुरलोकवन्द्यमानम् ।
श्रुतिमयमरुणं प्रणम्य वक्ष्ये सुजनहिताय मुहूर्तपारिजातम् ।।
अंकसंज्ञा-
एकादिनामानि वदन्त्यनुक्रमादेकस्य रजनिपावनिचन्द्रसंज्ञकाः ।
दस्राक्षियुग्मस्तनकर्णलोचनद्विबाहुपक्षा यमळं यमाश्विनौ ।।

End :

कल्याणमृच्छति तथैव समस्तलोकः ।। २३५ ।।

Colophon :

इति मुहूर्तपारिजाते चतुर्विंशोऽध्यायः ।

Post-Colophon :

श्रीवेङ्कटाद्रिपुत्रेण..... (श्रीकृष्णचन्द्र ?) सूरिणा ।
मुहूर्तपारिजातोऽयं वर्णितः स्यात् सतां श्रियै ।
श्रीकृष्णसूरीन्द्राणां चरणारविन्दवरलब्धवाग्विभवेन श्री वे....लिखितम् ।।

Serial No. 768

Mauñjīpaṭala, Anon. (MS. No. PM 1313 z-64)

Preliminary :

श्रीगणेशाय नमः ।

Beginning :

गणेशं गुरुं शारदां शास्त्रकारान् ग्रहान् पद्मिनीं वल्लभादीन् प्रणम्य ।
मया रच्यते मेखलाबन्धनार्थं मुहूर्तो बहूनां सुकल्याणरूपः ।। १ ।।

End :

विश्वकर्मोदिते धिष्ण्ये मण्डलं कारयेत्ततः ।
वेदिकां ब्राह्मणादीनां भापार्काष्टकरैर्मितम् ।।
दैवज्ञः —
अभिषेकनिषेके च व्रतोपनयनादिषु ।
विवाहेषु च यात्रायां चन्द्रः द्वादशगः शुभः ।।

Colophon :

इति मौञ्जीबन्धनम् ।

Post-colophon :

सं १७४७ वर्षे श्रावणशुदि १२ बुधे लिखितम् ।

Then follow two verses with the heading *atha vaidyasya ślokau* and a chart called *saptaśalākāvakram*.

Serial No. 770

Yātrā by Bādarāyaṇa (MS. No. PM 1313 z-51)

Beginning :

अथ बादरायणीया यात्रा लिख्यते ।
श्रेष्ठे चन्द्रबले तिथौ च दिवसे लग्ने च ताराबले
इष्टे चैव दिगीश्वरे सुशकुने यात्रानुकूलेऽनिले ।
सुस्वप्नैः शुभवारिकुञ्जररथैः संप्रस्थितैर्लग्नगैः
गन्तव्यं विजयाय भूमिपतिना रुष्टे तथा चेतसि ।।

End :

विप्रोऽसौ स्वामिनाथः प्रवरमदयुतो वारुणे वर्धमानं
क्षेत्रं वस्त्रं मयूरं कुसुमदधिपयश्चन्दनाङ्गो घटश्च ।
शस्त्रं कन्यार्थमांसं फलकुसुमलता गौ सवत्सा च योषा
माङ्गल्यं धर्मजस्थं स्वगमनमशुभं देवयानं च धन्यम् ।। १६ ।।

Colophon :

इति श्रीबादरायणी यात्रा समाप्ता ।।

Post-colophon :

शुभं भवतु । करकृतमपराधः(धं?) क्षन्तुमर्हन्ति सन्तः ।।

Serial No. 772

Yugalakṣaṇam Anon. (MS. No. 72238)

Preliminary :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ।।

Beginning :

अब्दादौ मित्रसंयुक्तं मङ्गलस्नानमाचरेत् ।

वस्त्रैराभरणैर्देहमलंकृत्य ततश्शुभैः ।।
यथा विभवसारेण भोजयेदिष्टबान्धवैः ।
वाणीं विनायकं खेटान् ... ब्राह्मणान् गुरून् ।
संपूज्य वत्सरफलं शृणुयाद् बन्धुभिस्सह ।।
अथ मेरुप्रशंसा कथ्यते- -
भूलोकं चैव विस्तीर्णं पञ्चाशत्कोटियोजनम् ।
जम्बूद्वीपं च विख्यातं विस्तीर्णं लक्षयोजनम् ।।

End :

कलियुगस्य शतायुः । एकपादधर्मम् । गङ्गा तीर्थम् । देवो मल्लिकार्जुनः । काञ्ची नगरम् । कामाक्षी पीठः । पुरुषप्रमाणं सप्त(?)हस्तत्रयम् । कलियुगस्य राजा परीक्षित्, जनमेजयः।

Colophon : Nil

Serial No. 773

Yogapraśaṃsā, Anon. (MS No. 72241-a)

Beginning :

विलग्न(नाथे ?) स्थितराशिनाथः तद्राशिनाथे यदि कर्मयुक्तः ।
निशाकरो केन्द्रगतोऽथवा स्याद्योगो महान् काहळसंज्ञकोऽसौ ।।
श्रीमान् काहळसंज्ञकोऽहजधुक् दानार्द्रपाणिस्तदा
कामी भोगसमन्वितो बहुयशः स्यादष्टविंशात् परम् ।
विद्यापादविनोदगोष्ठिरसिकः स्त्रीणां पतिर्दायकः
सौभाग्यात्मजमित्रबन्धुर्धनवान् राजा भवेद् धार्मिकः ।।

End :

नानादेशनृपात्मजे करकृते भूमण्डलाधीश्वरो
देवब्राह्मणसाधुभोजनरतो मानार्द्रहस्तः क्षमी ।
मेधावी सुरतप्रियो मधुरवाक् सर्वोपकारी महान्
पुत्रप्राप्तिसुखावहो मृदुतनुर्विद्याविनोदप्रियः ।।
चतुस्त्रिंशद्वत्सरमारभ्य यावद्वत्सरत्रयं कूर्मयोगेऽनुभवकालः ।

Colophon :

इति योगशास्त्रं समाप्तम् ।

Post-colophon :

१५८ हरिः ओम् । शुभमस्तु । प्रमोदाब्दे युग्मकृष्णपक्षे दशमी भौमवासरे कटकलग्ने सात्त्विकवेलायां वेंकटसुब्बन् कुमारन् सुब्बरामन् हस्तलिखितम् । सुगन्धिकुन्तलाम्बा-समेतश्रीमातृभूतं तुणै । शुभमस्तु ।

Serial. No. 776

Yogārṇava by Veṅkaṭeśvaraśarmā (MS. No. 72250)

Beginning :

नत्वा तं मनसा मतङ्गवदनं श्रीवेङ्कटेशः सतां
श्रीमानप्पयभूसुरात्मजवरो होराविदां प्रीतये ।
ज्योतिश्शास्त्रमहार्णवप्रकरणे संग्राह्य शास्त्राान्तरात्
वक्ष्ये जातकशास्त्रमार्गफलदं योगार्णवाख्यप्लवम् ।।
ऊहापोहविशारदः पटुमतिः श्रीकण्ठगोत्रोद्भवः
श्रीमत्काश्यपवंशजो गुरुकृपालब्धप्रसादो भुवि ।
त्रिस्कन्धार्थविदां विनायकपुरे जातः प्रशिष्यः कवि-
र्जम्बूनाथपदारविन्दरसिकः स्कन्धत्रयीमर्मभुक् ।।
अथ योगार्णवम्-
द्वितीये द्वादशे पार्श्वद्वये खेचर(संयुते) ।
शीतांशोस्सुनभायोगस्त्वनभायोग ईरितः ।।

End :

इति शशयोगफलम् । अथ हंसयोगफलम्-
रक्तस्योन्नतनासिको सुचरणो अंसप्रसन्नेन्द्रियः ।
गौरः पीनकपोलरक्तकरजो हंसः परश्रेष्टभूः ।।

Colophon : Nil

Serial No. 779

Yoginyaṣṭadaśākrama by Bālakṛṣṇa Bhaṭṭa (MS. No. PM 1313-z52)

Beginning :

सन्निघ्नागतनाडिकाप्रसवमस्याधो दशा हायनैः
सर्वर्क्षेण दशेन्दुभिर्विनिहतेनाप्तं समाद्यं फलम् ।
मुक्तर्क्षप्रहता दशाष्टनिचयादाप्तं दशाभैर्फलं
वर्षाद्यं च फलैक्यतो त्विति दशाभुक्तप्रमाणं भवेत् ।। १ ।।
श्रीमद् रामजिभट्टपादकमलद्वन्द्वैकपुष्पन्धयः
श्रीमद् यादवजस्तदीयभजनाल्लब्धावबोधः परम् ।
शम्भूक्तस्वरशास्त्रपुष्पचयतो नूनं चिनोत्यद्भुतं
योगिन्यष्टदशाक्रमं बुधमनोभृङ्गालसं तत्र तु ।। २ ।।
प्राग्जन्मनि श्रुताश्रुतकर्मजातं तच्छास्त्रमेतदखिलं प्रकटीकरोति ।
दीपो यथा तमसि सर्वधरादिजातं तस्माद् बुधैरतिसमादरणीयमेतत् ।। ३ ।।
भवानीं नमस्कृत्य वक्ष्ये सदर्थं दशायोगिनीं बालकृष्णाभिधानः ।
स्वभं रामयुक्तं भुजङ्गैस्तु नष्टं दशा मङ्गलाद्या भवन्ति क्रमेण ।। ४ ।।

End :

यः खेटोऽस्तभवनं तथारिभवनं नीचं प्रयातोऽथवा
युद्धे पापजितो हितस्य गदिता सर्वा दशा मध्यमा ।
यः स्वस्थजलाश्रितः स्वभवनं मूलत्रिकोणं खगो
मित्रागारमुपागतो निगदिता तस्याखिला सौख्यदा ।।१७ ।।

Colophon : Nil

Then follows a full page of charts of *daśā-s*.

Serial No. 780

Yogendumaṇḍala by Nṛsiṃha (MS. No. 69839)

Beginning :

उमासुतं नमस्कृत्य अम्बिकां हंसवाहिनीम् ।

योगानन्दगुरुं वन्दे परमानन्दरूपिणीम् ।। १ ।।
उमारमणसंकाशं सर्वेशं शशिशेखरम् ।
नीलकण्ठं महादेवं शंकरं प्रणमाम्यहम् ।। २ ।।
श्रीवत्सगोत्रोद्भवग्रन्थकर्ता नृसिंह कामाखिलशास्त्रवेत्ता ।
सिद्धान्तशास्त्रात् (?) बहुधा समर्था योगावलीजातकभागकर्ता ।। ३ ।।
सर्वार्थचिन्तामणिसूत्रभावं लक्ष्मीपतिर्जातकसंप्रभावा ।
इति ..... योगावलिमादरेण ।। ४ ।।
प्राचीनग्रन्था बहुधा च सन्ति श्रीनाथभावात् कश(?)मादरेण ।
तस्मादहं तदतसोरमर्थं (?) आदाय संक्षिप्य करोमि ग्रन्थम् ।। ५ ।।
भावाभावस्ततो दृष्टिः उच्चनीचफलाफलैः ।
शत्रुमित्रसमक्षेत्रं स्वद्रेक्काणनवांशकैः ।।६।।

End :

उच्चराशिगते भौमे उच्चांशे च चतुर्थके ।
गुरुश्चन्द्रेण संदृष्टो योगो भूपतिसंज्ञकः ।।
योगो भूपतिर्यो जातः स वै भूपतिसेवितः ।
ख्यातिवन्ते(?) भवेद् भूपः मण्डलेश्वरवल्लभः ।।

Colophon : Nil

Serial No. 823

Līlāvatī of Bhāskara with Anon. Com. (MS. No. 73631f)

Beginning :

गुण्यान्तमङ्कं गुणकेन हत्वा हतेन तेनैवमुपान्तिमादीन् ।
गुण्यस्त्वधोऽधः गुणखण्डतुल्यस्तं खण्डकैस्संगुणितो युतो वा ।।
भक्ते गुणः शुद्ध्यति येन तेन लब्धं च गुण्यो गुणिनः फलं वा ।
द्विधा भवेद् रूपविभाग एवं स्थानैः पृथग्वा गुणितस्समेतः ।
इष्टो न युक्तेन गुणेन निघ्नोऽभीष्टघ्नगुण्यान्वितवर्जितो वा ।।

Beginning of Commentary :

गुण्यान्त्यमिति । गुणानां गुणयोग्यानाम् अङ्कानां मध्ये योज्यश्चरमोऽङ्कः। तं गुणकेन हन्यात्

गुणयेत् । एवमुत्सारितेन अग्राग्राङ्कधःस्थापितेन गुणकेन उपान्तिमादीनङ्कान् गुणयेत् । गुणेन प्रकारान्तरमाह- गुण्य इति ।

Colophon : Nil

Serial No. 840

Varṣadaśāphalam, Anon. (MS. No. 72241-c)

Beginning :

जन्मनक्षत्रमारभ्य यावत् संक्रमणो रवेः ।
सप्तभिर्गुणितं चैव नवभिर्भागमाहरेत् ।।
अर्काङ्गारजीवकेतुश्च बुधशुक्रशनैश्चराः ।
चन्द्रराहुक्रमेणैव वत्सरस्य दशाधिपाः ।।

End :

पूर्वमथ विशेषार्कसकलं तदीयं नेष्टो भवेदन्यतरं विशेषम् ।।

Colophon : Nil

Post-colophon :

श्रीसुब्रह्मण्यस्वामि सहायम् । शुभमस्तु । अविघ्नमस्तु । सुबरामन् स्वहस्तलिखितम् । श्रीमातृभूतं तुणै ।

Serial No. 844

Vākyakaraṇa ascribed to Vararuci (MS. No. 69283)

Beginning :

अथ कुजमहावाक्यम् -
१० मङ्गळश्चीर्भूसुरः । ८० आत्मजयी शन्तनुः ।

End :

आद्यन्तवाक्यप्रमाणं कामेशः ।

Colophon :

इति वाक्यकरणे षष्ठाधिकारः । कुजादिपञ्चग्रहमहावाक्यं समाप्तम् ।

कुजादिमहावाक्यान्तं मासनेतुः । शुभमस्तु ।

Post-colophon :

स्वर्भानु वृषभमासं २९ कुजादिवाक्यं समाप्तम् ।

Serial No. 855

Vivāhapaṭalam (MS. No. PM 1313-z45)

Preliminary :

श्रीगणेशाय नमः ।

Beginning:

नत्वा वागधिदेवतां गणपतिं सूर्यादिदेवान् गुरून्
रामौ दाशरथि स्वकीयजनकौ श्रीकापिलः शंकरः ।
कुर्वे स्त्रीनरयोरहं परिणये कल्याणकालाप्तये
वृत्तैः षोडशभिर्विवाहपटलं ज्योतिर्विदां प्रीतये ।। १ ।।

End :

ये धर्माः कुलदेशजातिजनिता नोल्लङ्घनीया बुधैः
पारम्पर्यविदङ्गनोदितवचः पाल्यं विवाहादिषु ।
कृत्यं वर्णकमुख्यमुद्वहनभे कार्यं तथा मण्डपं
प्रागुद्वाहदिनात्तु वह्निनवषट्संख्येऽह्निनो कारयेत् ।।
कुन्नार्धाकृतिरल्पमूलविवरा वक्रा पयो मज्जने
तौल्ये दिक्पालसंमितेति (?)

Colophon :

इति श्रीकपिलजातीय-ज्योतिश्री-भट्टशंकरविरचितं षोडशश्लोकी नाम विवाहपटलं समाप्तम् ।

Post-colophon :

श्रीराम ।

Serial No. 856

Vivāhapaṭalam by Śrīnātha Paṇḍita (MS. No. PM 1313-z67)

Preliminary :

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

Beginning :

हेरम्बब्राह्मीसृष्टश्रीपश्रीकण्ठादित्यादीन्
खेटान् नत्वा वक्षेव्वद्या(?)देर्माने सम्यक् शुद्धम् ।
वैवाह्यं कर्म ग्रन्थानालोक्यान्यान् भूम्नश्लोकान्
अल्पीयो दैवज्ञानां प्रीत्यै पूर्वाचार्यैरुक्तान् ।। १ ।।
उक्ता राशिर्नाडी गाणी योनिर्वर्गः खेटो वा
वर्णा दूरं तारा वश्यश्चैवं दिग्भिर्मैत्री स्यात् ।
तुआ राशेः षष्ठं द्रव्यं वा सिंहान्यद् वर्ज्यं स्यात्
राशौ हीने मैत्री स्यान्मैत्र्यां हानौ राशिर्योज्यः ।। २ ।।

End :

देवेज्ये पूर्णाब्जे भे पूर्णव्योमेन्द्राप्ये साध्यै
पूर्णे शाके प्राप्ते पूर्णैकेऽर्के जीवे वारे ।
पौषे पूर्णायां पूर्णे चन्द्रे पुष्ये पूर्णं प्रोक्तं
वैवाह्यं कर्मेदं नाडीमाने नत्वा हेरम्बम् ।। ६० ।।

Colophon :

इति श्रीमत्पण्डितकृतं विवाहपटलं समाप्तम् ।

Post-colophon :

संवत् १७४६ (९?) शा१६१४ मार्गशीर्षे शुदि १२ गुरुदिने लिखितं रुद्रजितेन वटपद्रवासिना ।

Serial No. 858

Viṣakanyālakṣaṇa, Anon. (MS. No. PM 1313-z 60)

Beginning :

अथ विषकन्यामाह-

लग्ने शनौ रवियुते धनस्थे भूमिनन्दने ।
अस्मिन् योगे तु या जाता सा भवेद् विषकन्यका ।। १ ।।
तिथिर्भद्रा सुसार्पं च वारुणी च क्रमाद्यदा ।
भौमाकार्का दिनं तत्र जाता सा विषकन्यका ।। २ ।।
चतुर्दश्यां कुजे वारे रक्षोगणो यदा भवेत् ।
अस्मिन् योगे तु या जाता सा भवेद् विषकन्यका ।। ३ ।।
नवम्यां पूर्णिमायां तु भद्रायामशुभे दिने
व्यतीपाते तु संक्रान्तौ पितृणां च धनक्षयम् ।। ४ ।।

Colophon :

इति विषकन्या ।

Then follows a few verses called *upajāvāhā śloka-s*.

Serial No. 865

Veṅkaṭādrināthīyam by Narasiṃha (MS.No. 67306-a)

Preliminary :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
श्रीगुरुभ्यो नमः ।

Beginning :

श्रियः पतिं विभुं नित्यं सृष्टिस्थित्यन्तकारकम् ।
समस्तजगदाधारं वेङ्कटाद्रिं नमाम्यहम् ।।
द्वात्रिंशद्योजनैर्भाति भूमध्याद् वेङ्कटो गिरिः ।
तत्र स्थिते हरिपुरे विषुवद्भागुणाङ्गुला ।।
तस्य दक्षिणदिग्भागे द्वियोजनमिते नदी ।
कुशस्थलीति विख्याता तद्दक्षिणतटे स्थिते ।।
अग्रहारपदे देशे विद्वज्जनयुते वसन् ।
नरसिंहमहाराजपुरोहितशताग्रणीः ।।
त्रिपुरान्तकनामास्मिन् त्रिस्कन्धज्ञानवान् सुधीः ।
तस्यानुजोऽभूद् दैवज्ञः पदवाक्यप्रमाणवित् ।।

शिङ्गारार्य इति ख्यातः श्रीनृसिंहप्रसादजः ।
नृसिंहवरजातत्वात् सिंहादुत्पन्नसिंहवत् ।।
प्रतिवादिमहादन्तिसिंहो ..... गोलवित् ।
तत्सुतः श्रीनृसिंहोऽहं सूर्यसिद्धान्तसम्मतम् ।।
ग्रहतन्त्रं वेङ्कटाद्रिनाथीयाख्यं समारभे ।
षष्ट्याब्यस्ता(६०) गजयमैः(२८) संयुता गतवत्सरैः ।
नवसागर(४९)संयुक्ता भवन्ति शकभूपतेः ।।

Colophon :

इति श्री नृसिंहसूरिविरचिते वेङ्कटाद्रिनाथीये ग्रहतन्त्रे मध्यमाधिकारो नाम प्रथमोऽध्यायः ।।

Serial No. 876

Śivakeśavapādapadmadīpikā by Veṅkaṭādri

(MS. No. 73367)

Beginning :

.....पक्षाम्बिका
प्रावृन्नीरदशारदाभ्रवपुषौ ताक्ष्यार्क्षराजध्वजौ ।
वैकुण्ठाभिधपट्टणे च विलसत्कैलासशैले स्थितौ
साष्टाङ्गं प्र.....धौ ।। १ ।।
श्रीगौरीयुतकेशवेश्वरपदद्वन्द्वं हृदब्जेऽनिशं
सूर्येन्दुक्षितिपुत्रविद्रुरुभृगून् छायात्मजानात्मजान् ।
संपूज्य .....लं
विद्वद्वृन्दमहं नमामि निरतं चेष्टार्थसंसिद्धये ।।
चामुण्डिकाब्धितनयाकरुणाभिपूर्ण-
सौवर्णरत्न ..... ।
.....कणभूशकलं दिवो वा
कृष्णातटेऽतिमहितेऽस्ति विदर्भदेशः ।। ३ ।।
वैकुण्ठपट्टणमिहास्त्यमरावतीति
चैतत्पुरोत्तमयुगं..... ।

..... .सुराश्रयचिश्चितं वा
चन्द्रार्करार्पितसौधजालम् ।। ४ ।।
कैलासशैले महितो महेश्वरो वैकुण्ठशैलोपरि वेङ्कटेश्वरः ।
.....मदभीष्टदेवता ।। ५ ।।
तत्पादपद्मयुगलं हृदये निधाय
तद्दत्तराज्यनि.....च तदंघ्रियुग्मे ।
सर्वं मदाकारितशत्रु .....एव नित्यम् ।। ६ ।।
रमापार्वतीतुल्यलक्ष्म्यम्बिकायां
जगन्नाथनाम्नः प्रतापार्जुनाच्च ।
महीपालवर्णादभवं पवित्र .....
सम्पदं रमयतु मम मानसाज्यै(?)
प्रातर्दयापरधिया रविरेकदास्मात्
सर्वात्मकस्सकललोकतमोनिहन्ता ।। १३ ।।
सूर्यः समस्तजगतां प्रभवः परात्मा
त्रय्यातपो गणितभानुरिव प्रदीप्तः ।
ज्योतिर्मयो ग्रहपतिः शिवकेशवात्मा
सम्यक् प्रसन्न इति मां समबोधयत् सः ।। १४ ।।
त्वं मत्प्रसादादुपलभ्य कुरुष्व तन्त्रं
दैवज्ञवर्यसहितो निजराजधान्याम् ।
सिद्धान्तसंभव.....रत्नदेश
कालान्तरोद्भवविरोधमितीरितोऽहम् ।। १५ ।।

Colophon :

इति श्रीशिवकेशवचरणारविन्दमिलिन्दायमानमानसेन विद्वद्दैवज्ञनिकरनिरन्तराभ्रानन्तं(?) निरन्तराशीर्वाङ्भाजनेन वार्शिरेद्धि(?)वेङ्कटाद्रिमहीसुरेण विरचिते श्रीशिवकेशवपादपद्मदीपिकाग्रन्थे छायाधिकारः समाप्तः ।।

Serial No. 894

Saṭślokī with Anon. Com. (MS. No. 77533)

Beginning of Text :

अब्दे षट्कोऽपिभारः कविरसभयननार्यराट् सांशुकाव्यो

यन्नक्रार्क्यम्बिका यो ह्युपरि तु लहरी सा गीसन्नुरोचम् ।
भाच्छूच्छाक् सौमि योक्सो विषबिसपुलिनार्धे ह्यधो खं क्षयाब्दा-
दर्कान्मध्यं तुलोचोऽप्यथ लवखजं तेऽन्त्यर्कतुङ्गप्रदीपः ।। १ ।।

Com. :

अब्द इति । अब्दशब्देन दत्तो लोक इति शकाब्दा.....नन्ति.....न क्षयवर्षसहित-प्रभवादिगताब्दा उच्यन्ते । ...मादीनां साराहर्गण वर्षभोगप्रमाणादिराश्यादीनि कलान्तान्युच्यन्ते । तद्यथा कुजस्य षट्कोपि भार इति । षडिति षड्राशयः कोऽपि एकादश भागाः । भारः चतुर्विंशति कलाः । अत्र वर्षभोगवाक्येषु तत्तद्ग्रहाभियानं वेदितव्यम् । भार इत्यारः कुजाभियानं वेदितव्यम् ।

End:

तत्तद्ग्रहेष्टमिनमध्यादि चतुर्थां स्थाप्य एकं निक्षिप्य मन्दज्यां त्यक्त्वा तत्फलमानीय अर्धीकृत्य द्वितीयं योजयेत् । द्वितीयं स्थाप्य तत्र शीघ्रं त्यक्त्वा तत्फलमानीय अर्धीकृत्य तृतीयं योजयेत् । तत् तृतीये स्थाप्य मन्दं त्यक्त्वा तत्फलमानीय सकलं चतुर्थं योजयेत् । तच्चतुर्थं द्विधा स्थाप्य एकत्र शीघ्रं त्यक्त्वा तत्फलं सकलं अन्यस्मिन् योजयेत् । स कुजादिस्फुटो भवति । राहोस्तु इष्टमिनमध्यं पुलिनार्धे त्यजेत् । तदा स्फुटो भवति । षड्राशियुक्तः केतुर्भवति ।

Colophon : Nil

Post-colophon :

हरिः ओम् । श्रीगणेशाय नमः ।

Then follows the *candravākya*-s beginning with *gīrnaḥ śriyaḥ,* etc., 248 moon sentences, ending with *bhavet sukham*, with the colophon *gīrṇaḥ śreyādivākyam saṃpūrṇam*, and a few sentences as to find to use the *vākya-s.*

Serial No. 897

Saṃvatsaraphalam, Anon. (MS. No. PM 1313-z2)

Beginning :

ईश्वर उवाच —

कथयामि वरारोहे क्रूराः सौम्याश्च वत्सराः ।

येषां वै यानि रूपाणि तेषां च तदनु शृणु ।। १ ।।
प्रभवो विभवो शुक्रः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखः भावो युवा धाता तथैव च ।। २ ।।

End :

क्षये क्षयन्ति सर्वाणि नान्यथा वरवर्णिनि ।
दुर्लभं मानुषाः सर्वे इदं शास्त्रं सुनिश्चितम् ।। ६८ ।।
क्षये संवत्सरे प्राप्ते मीनस्थे च शनैश्चरे ।
अस्थिमाला भवेत् पृथ्वी लक्ष्मी यास्यति केशवे ।। ६९ ।।

Colophon :

इति श्रीषष्टिसंवत्सरफलम् ।

Serial No. 905

Santānadīpikā Anon. (MS. No. 66230)

Beginning :

गुरुनाथं नमस्कृत्य गणनाथं प्रणम्य च ।
वाग्देवीवन्दनं कृत्वा स्मृत्वा तं कमलोद्भवम् ।।
शंकरं विष्णुमभ्यर्च्य संपूज्याथ नवग्रहान् ।
वासुदेवं गुरुं ध्यात्वा वक्ष्ये सन्तानदीपिकाम् ।।
वराहहोरामालोक्य तथा जातकपद्धतिम् ।
सारावलीं ततो दृष्ट्वा पाराशरमतं तथा ।।
प्रश्नशास्त्राणि चान्यानि समालोक्य मुहुर्मुहुः ।
ततः सारं समुद्धृत्य वक्ष्ये सन्तानदीपिकाम् ।।

End :

व्ययेशे रन्ध्रके(गे ?) षष्ठे रन्ध्रेशे व्ययसंज्ञिते ।
धनधान्यसमृद्धिं च प्रवदेन्मतिमान् नरः ।।
सन्तानदीपिकाशास्त्रमेकविंशोत्तरशतैः ।
हृद्यैः पद्यैश्च यत्प्रोक्तं सज्जनैः परिगृह्यताम् ।।

Colophon :

सन्तानदीपिका समाप्ता ।

Post-colophon :

शुभमस्तु । करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

Serial No. 906

Santānadīpikā, Anon. (MS. No. 66233)

Preliminary :

सन्तानदीपिका ।

Beginning :

देवदेव जगन्नाथ शूलपाणे वृषध्वज ।
केनोपायेन मर्त्यानां शापात् सन्ततिदर्शनम् ।। १ ।।
तत्सर्वं ग्रहयोगेन फलाफलवशात् तथा ।
शापमोक्षं च कृपया प्राणिनां हितकाम्यया ।। २ ।।
श्रीशंकर उवाच —
साधु पृष्टं त्वया देवि कथयामि सुविस्तरम् ।
श्रुणुष्वेकाग्रमनसा साधूनामुपकारकम् ।। ३ ।।
ज्ञेयं सुनिश्चितात् सर्वं राशिचक्रे विशेषतः ।
मेषादिमीनपर्यन्तं मूर्त्यादिद्वादशं क्रमात् ।। ८ ।।

End :

लुप्ते पुत्राधिपे लग्ने सप्तमे भानुनन्दने ।
लग्नेशे बुधसंयुक्ते सन्ततेस्तस्य नाशनम् ।। १ ।।
पापग्रहयुते लग्ने पुत्रेशे नीचराशिगे ।
दारेशे पापसंयुक्ते बुधः (धे?) सन्ततिनाशनम् ।। ५ ।।
ज्ञातिस्थानाधिपे लग्ने....येशेन समन्विते ।
शशिसौम्यकुजाः पुत्रे सन्ततेस्तस्य नाशनम् ।। ६ ।।
तद्दोषपरिहारार्थं ह..स्सेपेन(?)मुच्यते ।
वापीकूपतडाकादिस्थापनं सेतुदर्शनम् ।। ७ ।।
पुत्रसिद्धिर्भवेत्तस्य तद्वद् वृद्धिः प्रजायते ।
शापयोगग्रहेणैव फलं ब्रूयाद् विचक्षणैः ।। ८ ।।

विद्यागर्वेण यो मर्त्यो ब्राह्मणानवमन्यते ।
तद्दोषं ब्रह्मशापत्वात् सन्ततेस्तस्य नाशनम् ।।

Colophon : Nil

Serial No. 907

Santānadīpikā, Anon. (Ms.No. 77559-f)

Preliminary :

हीरः ओम् । शुभमस्तु । श्रीदक्षिणामूर्तये नमः । सन्तानदीपिका ।

Beginning:

नमो वाणीं शचीं लक्ष्मीं पार्वतीं भुवनेश्वरीम् ।
मातरं च त्रिमूर्तीनां वन्देऽहं प्रणवात्मिकाम् ।।
विघ्नविच्छेददक्षाय विघ्नविच्छेदहेतवे ।
विष्णुरूपाय शान्ताय विघ्नेशाय नमो नमः ।।
कैलासशिखरे रम्ये नानाधातुपरिष्कृते ।
विचित्रनवरत्नाभे शुभसिंहासने स्थितम् ।।
इन्द्रादिलोकपालैश्च पूजितं भुवनेश्वरम् ।
ब्रह्मर्षिसंयुतं शान्तं ब्रह्मविष्ण्वादिसेवितम् ।।
मन्मथध्वंसिनं रुद्रं रतिदेव्या वरप्रदम् ।
प्रसन्नवदनं देवं नत्वा स्तुत्वाथ पार्वती ।।
किञ्चिन्नम्रमुखी भूत्वा स्थिता सा लज्जया तदा ।
एवंभूतां स्वकान्तां तां सभायां प्रष्टुमालसाम् ।
अग्रखिन्नां निजाङ्कस्थां पप्रच्छ परमेश्वरः ।।
एहि कल्याणि गिरिजे किमिदं ते मनोव्यथा ।
इति श्रुत्वा स्वपत्युस्सा वाचं हृद्यं शुभान्वितम् ।।
अङ्कादुत्थाय शम्भोस्तु नत्वा भक्तिविनम्रधीः ।
पुनः पप्रच्छ भर्तारं पार्वती परमेश्वरी ।।
न मे पुत्रसुखं किञ्चिन्न मेऽस्ति मनसस्सुखम् ।
केन दोषेण भो शम्भो गर्भ स्कन्नं वदस्व भो ।।
गिरिजाया वचः श्रुत्वा खिन्नायाश्शम्भुरादरात् ।

आरोप्याङ्के निजामार्यां पत्नीं प्रोवाच शंकरः ।
श्रृणुध्वं गिरिजे त्वं हि दोषान् षट्सप्तसंज्ञकान् ।
प्राणिनां चैव सर्वेषामङ्गनानां विशेषतः ।।
नराणां चानपत्यत्वं दत्तपुत्रादिसंभवम् ।
स्रावं सन्ततिनाशं च मृतपुत्रत्वमेव च ।।
स्कन्नं च क्रिमिकोपं च रक्तस्रावं तथैव च ।
भूतग्रासा रतौ भिन्नं शुक्लतोयत्वमेव च ।।
परिवेषं तथाग्नेयमेते दोषास्त्रयोदश ।
कारणश्चैकपुत्रत्वं बहुपुत्रत्वमेव च ।।
एकपुत्रत्वमेकायां पत्न्यामेक.....तथा ।
स्त्रीप्रसूतित्वमेवाथ पुंप्रसूतित्वमेव च ।।
अन्यक्षेत्रभवत्वं च अन्यबीजात् समुद्भवम् ।
एवमष्टविधं प्रोक्तं पुत्रोत्पत्तौ तु कारणम् ।।
पुण्यापुण्यं पूर्वमेव यत्कृतं ज्ञानतोऽपि वा ।
अज्ञानतो वा ह्येतत्ते समुपस्थितमद्य वै ।।
कृतं पुण्यं च भोक्तव्यं तद्भदेवाशुभं कृतम् ।
इतः परं महाभागे मा कृथास्त्वं मनोव्यथाः ।।

Colophon :

इति सन्तानदीपिकायां उमामहेश्वरसंवादे जातकसुधार्णवे शताधिके एकसप्ततितमोऽध्यायः ।।

End :

द्विजपुत्रदरिद्रं हि प्रतिष्ठां तु कराति चेत् ।
सुपुत्रपौत्रसंयुक्तं लब्ध्वा तु भुवि मोदते ।।
शुक्रसंगतदोषस्य प्रायश्चित्तमुदाहृतम् ।
सेतुस्नानं च कर्तव्यमथवा त्रिशतीं जपेत् ।।
मन्त्रं जपेत् षोडशीं वा पञ्चसाहस्रसंख्यया ।
दुर्गापूजाकृतैस्सद्यः सुपुत्रं लभते ध्रुवम् ।।

Colophon :

इति सन्तानदीपिका संपूर्णा ।

Post-colophon :

हरि:ओम् । शुभमस्तु । श्रीगुरुभ्यो नम:।
श्रीदक्षिणामूर्तये नम: ।।

Serial No. 908

Santānadīpikā (I) Anon. (MS.No. 73867)

Beginning:

यो ब्राह्मणो या कुमुदेषु देव(?)ष्वन्द्रा(?)तिथौ मध्यम.....र्वी ।
दत्ते सुतं यस्तमितं विहाया(?) च्छेषात् परं यो भजते स कुण्ड: ।।१।।
दैवी ब्राह्मणता हरस्य निखिलं मायाधिकारक्रमै:
दध्यारेर्भुज(?)जन्मताखिलजगद्रक्षाकला..क्रमै: ।
आस्ते पद्मभवस्य .....परता सर्वाद्रिसम्प.....
राधित्य(?)पते: पदाब्जभवता वृष्ट्याभिसस्या वरै:।।२।।
सूर्यायते चारु तपोधनानां वर्त्मायते जन्मविवर्जितानाम् ।
दीपायते यो जगतामभीष्टं ददातु नस्सोऽद्यतरानपेक्षम् ।।
वार्णी शर्ची महालक्ष्मीं पार्वतीं भुवनेश्वरीम् ।
मातरं च त्रिमूर्तीनां वन्देऽहं प्रणवात्मिकाम् ।।

End :

शुक्रसंगतदोषस्य प्रायश्चित्तमुदाहृतम् ।
सेतुस्नानं च कर्तव्यमथवा त्रिशतीं जपेत् ।।
मन्त्रं....शी वा पञ्चसाहस्रसंख्यया ।
दुर्गापूजाकृतैः सद्यः सुपुत्रं लभते....वम् ।।
श्रीगुरुभ्यो नमः ।

some related matter in some leaves that follow.

Serial No. 909

Sarvatobhadracakra, Anon. (Ms.No. 72241-b)

Beginning :

अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ।

विख्यातं सर्वतोभद्रं सद्यः प्रत्ययकारकम् ।।
ऊर्ध्वगा दश विन्यस्य तिर्यग्रेखास्ततो दश ।
नवभिर्नवभिः कोष्ठैः सर्वतश्चक्रमुत्तमम् ।।
एकाशीतिपदं चक्रं जायते नात्र संशयः ।
अकारादिस्वरान् कोष्ठेष्वीशादि विंशतिः क्रमात् ।।
सृष्टिमार्गेण दातव्यं षोडशान्तः प्रयत्नतः ।
कार्तिकादीनि धृष्णानि पूर्वाभिः क्रमशस्तथा ।।

End :

त्रिपेती(?)ये न भवेद् भङ्गं मरणं स्याच्चतुर्ग्रहे ।
यथा दृष्टफला क्रूरा सौम्या शुभफलप्रदाः ।।
क्रूराथवाक्रूरा सौम्या क्रूराशुभफलप्रदः ।
सर्वकार्येषु सर्वेषु राहुर्विघ्नप्रदो यतः ।।
शुभस्त्री विधवा हन्त्री ब्रह्मद्वेषी च जायते ।
शनिवत्कुजवच्चैव राहुकेतू शुभाशुभम् ।।
इति सर्वतोभद्रम् ।

Colophon :

देववामासाधनपगपादिनी न च गृहवेधनं नाम द्वितीय परिच्छेदः ।

Post-colophon :

हरिः शुभमस्तु । प्रमोदाब्दे मिथुने मासे कृष्णपक्षे एकादश्यां तिथौ बुधवासरे विंशतिघटिकालग्नतुलायां सुब्बरामन् सर्वतोभद्रचक्रं स्वहस्तलिखितम् । शुभमस्तु ।

Serial No. 915

Sarvārthacintāmaṇi by Veṅkaṭeśa (MS. No. 69462-a)

Preliminary :

श्रीहयग्रीवाय नमः । श्रीमद्रामानुजाय नमः। अस्मद्गुरुभ्यो नमः।

Beginning :

श्रीमच्छेषगिरिस्तटादिनिलयं श्रीवेङ्कटेशं गुरुं

नत्वा वेङ्कटनायकं त्वनुदिनं जातोऽप्ययायात् सुधीः।
ज्योतिश्शास्त्रमहाब्धिपारगमने वक्ष्यामि पोतात्मकं
ज्योतिश्शास्त्रविवेकपाकविदुषां सर्वार्थचिन्तामणिम् ।।
मेषादिराशयस्सर्वे दिनेशप्रमुखा ग्रहाः ।
ये च लोकोपकर्तारः पान्तु मामिह सर्वदा ।।
यज्जातके निगदितं भुवि मानवानां
तत्प्राश्निकेऽपि सकलं कथयन्ति तज्ज्ञाः ।
प्रश्नेऽपि जन्मसदृशो भवति प्रमोदः
प्रश्नस्य चेत् प्रजननस्य न कश्चिदस्ति ।।
संज्ञाध्याये वर्णितात्सर्वशास्त्रात्
सारं बुध्वा सर्वलोकोपकारः(? रम्) ।
यद्यत् सर्वं वेंकटेशेन बुद्ध्या
तत्तत्पात्रे योजयेत् तत्फलानि ।।

Colophon : to ch-I :

इति सर्वार्थचिन्तामणौ संज्ञाध्यायो नाम प्रथमः ।

End :

एवं शुक्रे सप्तमस्थे स्थितस्य
वर्गाधीशो भूमिचैनैनि (?) ना वा ।
संयुक्तास्ते चन्द्रयुक्तो भवास्स्युः
र्जातोऽन्यस्त्रिसङ्गः शशिशुक्र :
वस्त (?) गतौ कुजशनिवर्गस्थिता तदा जातः

breaks off.

Colophon: nil

Serial No. 920

Sāmudrikam. Anon. (MS.NO. 70169-b)

Preliminary :

हरिः । श्रीगणेशाय नमः । अविघ्नमस्तु ।

साक्षात् त्रैलोक्यसंबन्धुं(?) प्रश्नं केवलभाषितम् ।
त्रितालविषयं प्रोक्तं तस्मै सर्वविदे नमः ।।
यदुपचितमन्यज्जन्मणि शुभाशुभं तस्य लक्षणं प्रोक्तम् ।
(?)विजयति विज्ञानमिदं प्रणाश्य (प्रकाश्य ?) चिह्नानि दीप इव ।।
आदिदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शनम् ।
सामुद्रिकं प्रवक्ष्यामि शुभदं पुरुषस्त्रियः ।।
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीनमनुष्याणां लक्षणैः किं प्रयोजनम् ।।
Malayalam com. fallows.

अष्टाधिकं शतं चैव नवतीपरिमाणतः ।
उत्तमस्समहीनानां जायते पुरुषाकृतिः ।।

End :

श्रीपद्मासनवारिकुञ्जररथं श्रीवृक्षयष्टयाकृतिं
माल्यामण्डलचामराङ्कुशयवैः शैलध्वजस्तोरणैः ।
मत्स्यस्वस्तिकवेदिकाव्यजनकैः शङ्खारिपद्माम्बुजैः
पादे पाणितले यथा युवतयो गच्छन्ति राज्ञीपदम् ।।
Malayalam com. folows.

Colophon : Nil

Serial No. 921

Sāmudrikalakṣaṇam (I) Anon. (MS. No. 70169-a)

Beginning :

अथाहं नरनारीणां लक्षणं च शुभाशुभम् ।
विगाह्य सर्वशास्त्राणि कथयामि यथा तथा ।।
मांसवर्णैर्नखैर्भूपैर्बभ्रूस्ताम्रोपमैर्धनिः ।
रक्तैरपुष्पितैर्मर्त्यो भवेत् सौभाग्यवान् शुचिः ।।
श्वेतैर्नखैर्विरूपैश्च दुःखजीवी भवेन्नरः ।
शूर्पाग्रैः स्फुटितैर्वक्रैर्नरो दारिद्र्यभाग् भवेत् ।।

End :

नखा यत्र प्रदृश्यन्ते इन्द्रकोपलसंनिभाः ।
राजानं तं विजानीयात् नारदस्य वचो यथा ।।
नैव तस्य बलं ग्रीवं गाम्भीर्यं तस्य भाषितम् ।
दीर्घे तनोः छिन्नवक्षो भवन्ति चिरजीविनः ।।
अंकुशं तण्डुलं चक्रं यस्य पाणितले भवेत् ।
तस्य राज्यं विनिर्दिष्टं समुद्रवचनं यथा ।।

अंगुष्ठमात्रप्रभवास्तु रेखाः
पुत्राः भवन्ति प्रमदाश्च तद्वत् ।
अच्छिन्नदीर्घा बृहदायुषस्ते
स्वल्पायुषश्छिन्नलघुप्रमाणाः ।।

Colophon : Nil.

Serial No. 923

Sāmudrikalakṣaṇa II. Anon. (MS.No. 66342-a)

Preliminary :

श्रीगणपतये नमः । श्रीगुरुभ्यो नमः ।

Beginning :

आदिदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शनम् ।
सामुद्रिकं प्रवक्ष्यामि शुभगं पुरुषस्त्रियोः।।१।।
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननरा नार्यो लक्षणैः किं प्रयोजनम् ।।२।।
वामभागे तु नारीणां दक्षिणे पुरुषस्य च ।
निर्दिष्टं लक्षणं तेषां समुद्रवचनं यथा ।।३।।

End :

ज्ञातव्यं विबुधैस्त्रीणां लक्षणं वाप्यलक्षणम् ।
कुलवृद्धिर्यशोवृद्धिर्लक्ष्मीवृद्धिर्भवेद्यतः।।

Colophon :

इति सामुद्रिकशास्त्रे लक्षणाध्यायः समाप्तः ।

Post- colophon :

गुरुभ्यो नमः । हरिः ओम् ।

Serial No. 924

Sāmudrikalakṣaṇa III. Anon. (MS. No. 66344)

Beginning :

प्रणम्य शिरसा देवं शिवं सर्वजगत्पतिम् ।
सर्वज्ञं सर्वकर्तारं विश्वैकजननीपतिम् ।।१।।
उक्तं सामुद्रिके शास्त्रे नराणां यच्छुभाशुभम् ।
तदहं संप्रवक्ष्यामि पुंसां स्त्रीणां च लक्षणम् ।।२।।

End : Breaks off abruptly.

Serial No. 925

Sāmudrikalakṣaṇam IV. Anon. (MS. No. 66345)

प्रस्थानेन स्त्रीपुरुषयोः सामुद्रलक्षणमुच्यते-
लक्षणानि प्रवक्ष्यामि स्त्रीपुंसोश्च यथाक्रमम् ।
वामभागे (तु नारीणां) दक्षिणे पुरुषस्य च ।।
वर्णात् परतरः स्नेहः स्नेहात्परतरः स्वरः ।
स्वरात् परतरं सर्वं सर्वं सत्त्वे प्रतिष्ठितम् ।।

End :

षोडशनिशा स्त्रीणां तस्मिन् युग्मा सुरसंविशेत।
ब्राह्मचार्येव पर्वाणि आद्याश्चत्वारि वर्जयत् ।।

Colophon : Nil.

Post-colophon:

हरिः ओम् । हयग्रीयवस्वामि पाहि माम् ।

Serial No. 932

Sāmudrikalakṣaṇa V. Anon. (MS. No. 77532)

Beginning :

भगवन्तं हृषीकेशं नारदः परिपृच्छति ।
बहिर्लक्षणसंक्षेपं मनुष्याणां यथाक्रमम् ।।
केशवः प्रत्युवाचेदं बहिर्लक्षणकोविदः ।
कर्मणां प्रकृतेनाथ नराणां भागधेयतः ।।
शरीराण्युपचिन्वन्ति तस्माल्लक्षणमुच्यते ।
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।।
आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ।
वामभागे तु नारीणां दक्षिणे पुरुषस्य तु ।।
आकारैरिङ्गितैर्ग(त्या) चेष्टया भाषणेन च ।
नेत्रेण भ्रूविकाराणां(?रैश्च) गूढैरन्तर्गतं मनः ।।

End :

रेखां विद्यां श्रियं राज्ञां वक्तृत्वे च प्रयच्छति ।
दानसंज्ञा —देास्स्थाने किञ्चिद्दक्षिणहस्तवत् ।।

Serial No. 939

Sāmudrikasāra Anon. (MS. No.TR489)

Beginning :

श्रियः पतिरमेयात्मा स्वयंभूर्भगवान् हरिः ।
वटपत्रं समाश्रित्य शेते कल्पोदके प्रभुः ।।
योगनिद्रासमापन्ने तस्मिन् लौकिककारणे ।
अतीतानि युगान्यारा .....(?)
.....
सुलक्षणा सदाचारा पत्युरायुर्विवर्धयेत् ।।

सदा ग्रही(?गृही) सुखं भुङ्क्ते स्त्री लक्षणवती यदि ।
अतः सुखसमृद्ध्यर्थमादौ लक्षणमीक्षयेत् ।।

End :

योग्यदम्पतिसंयोगात् सन्ततेस्तु महाफलम् ।
तेन धर्मत्राणनं च मुनिभिः परिकीर्तितम् ।।
तस्मात् शास्त्रोक्तमार्गेणसामुद्रिकफलादिकम् ।
ज्ञात्वा क्रमादुपदिशेज्जगतां श्रेयसे बुधः ।।

Colophon :

इति सामुद्रिकसारः समाप्तः ।

Serial No. 940

Sārasamuccaya, Anon. (MS.No. 69363)

Beginning :

जगत्यमेयांशुनिधिर्जगत्त्रयी प्रबोधहेतुस्सविता त्रयीमयः ।
न स दर्शित्वमितोऽपि नाभवेदितीव यं नेत्रमधत्त शंकरः ।।१।।
यश्शास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिः ज्योतिषं
तस्योच्छेदभयात् पुनः कलियुगे संश्रित्य यो भूतलं
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ।।२।।
राहुमान्दिसमायोगे नेत्रे वामजसंयुते ।
सन्निपातवसूर्यादिपन्निकाष्ठेन नेत्रहा ।।
दक्षिणाक्षि धनस्थानं दक्षिणाक्षि व्ययजं भवेत् ।
एवं द्वितीयव्याधिः चिन्तनीया ।।

Colophon :

इति सारसमुच्चयं द्वादशभावं समाप्तम् ।

Post-colophon :

श्रीरामाय मङ्गळम् । शिवाभ्यां नमः । शुभमस्तु ।

Serial No. 947

Siddhāntasaṃgraha, Anon. (MS. No. 66402)

Preliminary :

ओम् ।

Beginning :

ब्रह्माच्युतेशरूपैर्यः सृजत्यवति हन्ति च ।
तं भास्करमहं वन्दे बहिरन्तस्तमोपहम् ।।१।।
नत्वा शशांकभौमज्ञगुरु.....।
राहुकेतून् तथाचार्यान् वक्ष्ये सिद्धान्तसंग्रहम् ।।२।।
खरसा(६०) गजनेत्र(२८)घ्ना गतवत्सरसंयुता ।
न.....संयुता भवेयुः शकवत्सराः ।।३।।
शाको वश्वतिध्यूनो (१५२८) रहघ्नो(१२)मासयुक् द्विधा
(१३०) खशि (३०) हृतो दिनैः
वेदघ्न(४)...संयुक्ता भवेयुः शकवत्सराः ।।३।।
द्विधा सुरै(३३)र्युतो जघ्नो(११) ।
रामरूपाद्रि(७०३)विभाजि(?तः)

End :

पूर्णाष्टचन्द्रशून्यांका तर्काग्नियमला लवाः ।
अथ परहिते भेदं शिष्टं सिद्धान्तसंग्रहे ।।

Colophon :

इति सिद्धान्तसंग्रहे परहितभेदो नाम षष्ठोऽध्यायः ।

Post colophon : Enumeration of the mean motion of the planets and *māsa vākyas* follow:

मध्यगतिः । रविगतिः नित्यदानधर्मः । चन्द्रगतिः रमावर्गो नित्यं लोके । तुङ्गगतिः धर्मो नवतिः। कुजगतिः हरिश्चन्द्रः कुली । बुधगतिः पुत्रो रागी मानवः । गुरुगतिः धनी धर्मवित् ।

शुक्रगतिः भवसेना तुङ्गाय । शनिगतिः गुरुज्ञानश्रीः । राहुगतिः शिवो नित्याङ्गः ।

रविः ५९-८-१०, चन्द्रः १३-१०-३४-५२-

तुङ्गः ६-४०-५९- कुजः ३१-२६-२८- बुधः ४-५-३२-२१- गुरुः ४-५९-९-। शुक्रः १-३६-७-४४-

शनिः २-०-२३- राहुः ३-१०-४५- तत्परादिखमध्यगतिः ।

सिद्धान्तसंग्रहप्रकारकटपयादिसंख्य(या)पठितमासवाक्यानि ।

(वृ) संततिमित्रा । (मि) शूकरवक्षा । (क) सानयनागो ।

(सि) सारधराते । (क) शाकिनिगळट्टी ।(तु) तत्पतिः शम्भुः । (वृ) स्यात् कुलभूमिः । (ध) सर्वजयाय ।(म) काव्य सुगौरी । (कुं) मान्यधनोध ।(मी) नाम गणेशो । (मे) योगमयोयम् । भानुवारादिकक्रमात् ।

Serial No. 954

Sūryasiddhānta with com. Kalpavallī by Yallayārya (MS.No. 77510)

Preliminary :

श्री गुरुभ्यो नमः । सूर्यसिद्धान्तं कल्पवल्लीव्याख्यानम् ।

Beginning :

यो देवश्चन्द्रमौलिस्त्रिनयनविलसद्वक्त्रपद्मः कराल-
क्ष्वेळग्रासी कपाली सकलसुरपतिः शंकरः पार्वतीशः ।
कृत्वा रक्षांसि निघ्नन् सकलजगदिदं मायया निर्गुणस्सन्
नित्यः सत्त्वादिरूपो विमलमतिमतां बुद्धिवाग्मी तमीडे ।।
कण्ठे काळं त्रिनेत्रं तुहिनकरवियद्वाहिनीसक्तचूडं
नानालंकारयुक्तं विमलकरगणैरक्षसूत्रञ्च विद्याम् ।
सौधं संपूर्णकुम्भं पटुतिमिरहरं ज्ञानमुद्रां दधानं
वन्दे श्रीदेवदेवं सकलसुरनुतं दक्षिणामूर्तिमीशम् ।।
श्रीवाणीशं माधवं पार्वतीशं श्रीवी(रे)शं विघ्नराजोडुखेटान्
नत्वा सूर्यं देशिकं यल्लयाख्यं सम्यग् वक्ष्ये सौर्यतन्त्रस्य टीकाम्।।

इह शास्त्रे कानि संबन्धाभिधेयप्रयोजनान्युच्यते - अविगीतशिष्टाचारपरम्परावाप्तमिष्टदेवतानमस्कारलक्षणं मङ्गलं मुखतः संपादयन् श्रीभगवान् सूर्यदैवज्ञ आह ।

Beginning of Text :

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः ।।

Colophon :

अचिन्त्याव्यक्तरूपाय - न चिन्त्यः अचिन्त्यः ।
तथैवोक्तं ब्रह्मणा ।

End :

इत्येतदखिलं ब्रह्म पैतामहमनुत्तमम् ।
यो वेद स परं ब्रह्म सदानन्दः स्वयं भवेत् ।।
ये कल्पवल्लीसदृशां मयोक्तां टीकां प्रयत्नेन विलोकयन्ति ।
ते सर्वसिद्धान्तविदो भवेयुः मुक्त्वेव कामान् सकलं लभन्ते ।।
अन्दख्याः सौम्यभागे सकलशुभकरः कल्पकुर्वाभिधान-
स्तस्मिन् .. प्रसिद्धस्सकलगुणयशास्तत्सुतो यल्लयाख्यः ।
तत्पुत्रः श्रीधराख्यः श्रुतिपठनपटुः तत्सुतो यल्लयाख्यः
श्रीसूर्यात् प्राप्तविद्यो शिवनिहितमनाः काश्यपोऽस्ति प्रसिद्धः।

Colophon :

इति श्रीमच्चन्द्रशेखरवरलब्धश्रीबालादित्यसुतसूर्याचार्यशिष्येण श्रीधरार्यपुत्रयल्लयाख्येन सूर्यसिद्धान्तस्य मानाध्यायस्य कल्पवल्लीनाम टीका कृता । मानाध्यायस्य कुप्रदश(?)समाप्तः।।

Post colophon :

श्रीकृष्णसूरीन्द्राणाञ्चरणारविन्दलब्धवाग्विभवेन श्रीवेंकटेश्वरसुब्र(ह्म)ण्येन लिखितेयं श्रीसूर्यसिद्धान्तकल्पवल्ली पञ्चिका। श्रीसूर्यसिद्धान्तस्य व्याख्या संपूर्णा ।।

Serial No. 956

Sūryasiddhānta with com Kāmadogdhrī (MS.No. 77312)

Preliminary :

श्रीहयग्रीवाय नमः।

Beginning :

श्रीविद्याहृदयस्थितां शिवमयीं श्रीमत्समाराधितां
कामाक्षीं करुणाकटाक्षकलितां कल्याणसन्दायिनीम् ।
कोदण्डांकुशपाशबाणविलसद्धस्तां प्रसन्नाननां
सिन्दूरारुणदेहकान्तिमनिशं श्रीहोन्नमाम्बां भजे ।।१।।
शुभ्राङ्गं पीतवस्त्रं सुरतरुसदृशं सूर्यकोटिप्रकाशं
नानाभूषासमेतं नलिनभवयुतं नागयज्ञोपवीतम् ।
शूलं पाशं च खड्गं डमरुकमतुलं पाणिपद्मैर्दधानं
मैराराख्यं महेशं मणिमयमकुटं मालचीनाथमीडे ।।२।।
सत्यज्ञानानन्दमव्यक्तरूपं मायातीतं मायया कल्पिताङ्गम् ।
सर्वाधारं सर्वभूतान्तरस्थं सोमेशाख्यं बह्मतत्त्वं नमामि ।।३।।
ग्रहमप्यहमाश्रये रविं स्फुटचारग्रहकान्तिकाणम्
ग्रहयोगविरश्मिरश्मिको...(?) गतपाताण्डजयज्ञयानगतिम्।।४।।
यदेवं दन्तच्छविचन्द्रबिम्बे
प्रकाशिते विघ्नतमःकृतस्य ।
तस्मादहं दन्तिमुखाभिरामं
नमामि विधनेश्वरमिष्टसिद्धयै ।।५।।
नमो ग्रहेभ्योऽथ नवग्रहेभ्यो
नमोऽश्विनीमुख्यसुतारकेभ्यः ।
नमो गुणग्राहकतान्त्रिकेभ्यः
नमोऽस्य विद्वत्कुज(?)नेतरेभ्यः।।६।।
ये होन्नयार्यादिकुलप्रसिद्धाः
सूर्यादिसिद्धान्तविदो महान्तः ।
ये मल्लयज्वादिसमस्ततन्त्र-
व्याख्याधुरिणो मम देवतास्ते ।।८।।
श्री होन्नयार्यस्सर्वतन्त्रस्वतन्त्र-
स्तस्माज्जातस्तादृशो मल्लयज्वा ।
तज्ज्ञः ख्यातस्सर्वसिद्धान्तवेत्ता
शाकिन्याख्ये पत्तने मल्लयज्वा ।।

तत्पुत्रोऽहं वेदवेदान्तवेदी
ज्योतिर्विद्यापारगस्तम्मयज्वा ।
सूर्यन्नत्वा सूर्यतन्त्रस्य टीकां
होनांबायै कामदोग्ध्रीं करोमि ।।९।।

इह तावत् प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामः स्वेष्टदेवताप्रमाणरूपं मङ्गलं श्लोकतो निबध्नाति - अचिन्त्येति ।

Beginning of text :

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः ।।

Colophon :

ब्रह्मणे परमात्मने नम इति सम्बन्धः।

End :

अथ चन्द्रदिवसात् दर्शा( )ज्ञा इति ।
चान्द्राः खाष्टखखव्योमखाग्निखार्कनिशाकराः।।

Serial No. 957

Sūryasiddānta with com. Kāmadogdhrī (Ms.No.77508)

Beginning :

commences from ch.V. but has the end of the work,while the previous Ms.no.77312 does not have it. At the end is reproduced here from this MS.

Text :

स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत् ।

Com. :

ऋषयः सूर्याल्लब्धवाङ्मयं ज्ञात्वा तस्य समीपं गत्वा परिपप्रच्छुः आदरात् ज्ञानं पप्रच्छुः । स प्रीतो मयः तेभ्यो ऋषिभ्यो महच्चरितं प्रददौ विज्ञापितवान् । तस्य प्र....नं सार्धश्लोकेनाह -।

Text :

अत्यद्भुतमिदं लोके रहस्यं ब्रह्मसंमितम् ।

देवस्य निर्मलं चक्षुः ज्ञात्वा साक्षाद् विवस्वतः ।
विदित्वैतदशेषेण परं बह्माधिगच्छति ।।

Com. :

लोके अस्मिन् मनुष्यलोके अत्यद्भुततमं आश्चर्यतमं रहस्यम् । ब्रह्मसम्मितं बह्म वेदः , तेन समम् ....

किञ्च तथाविधश्रुतेरनोकलनाचेति जीवब्रह्मणोरभेद एव पारमार्थिकः।

Colophon :

ये कामदोग्ध्रीसदृशां मयोक्तां
होनाम्बिकाप्रीतिकरां च टीकाम् ।
सम्यक् प्रयत्नेन विलोकयन्ते
ते सर्वसिद्धान्तविदो भवेयुः ।।
घनादिनिकटो भाति पश्चिमपरगी पुरी ।
तस्यां श्री होन्नमाम्बायाः प्रसादाद् होन्नयाभिधः ।।
विद्वान् श्रीसूर्यसिद्धान्ताद्यष्टसिद्धान्तपारगः ।
रवितरकुलाम्बोधिसुधांशुसदृशः प्रभुः ।।
ऋग्वेदी वेदवेदान्तशास्त्रज्ञो मन्त्रकोविदः ।
सर्वज्ञसदृशः प्राज्ञो वर्त्तते सर्वभोगभाक् ।।
तस्यात्मजो मल्लयज्वा सर्वतन्त्रस्वतन्त्रकः ।
तत्पुत्रौ मल्लयज्वा च सोमनाथाध्वरी ह्युभौ ।।
नित्यान्नदाननिरतौ विद्वज्जननिषेवितौ ।
राजाधिराजसम्मान्यावनेकग्रामदक्षकौ ।।
सप्तसन्तानवन्तौ तौ सर्वसिद्धान्तवेदिनौ ।
पुत्रपौत्रधनैश्वर्ययुक्तौ भोगसमन्वितौ ।।
मैलारेश्वरसोमेशवरलब्धशरीरिणौ ।
तन्मध्ये मल्लयज्वाख्यवेंकटाम्बातनुर्भवः।।
तम्मयार्यः सुतः शास्त्रे वेदान्ते शब्दशास्त्रके ।
ज्योतिषे वेदवेदाङ्गश्रौतस्मार्ताखिलेषु च ।।
निपुणः श्रीहोन्नमाम्बावरवाग्विभवः सुधीः ।

इति श्रीहोन्नमार्यस्य पौत्राच्छिवगुरुसदृशान्मल्लयज्वाख्यपुत्राज्जातो मल्लाध्वरीन्द्रात् परगिपुरस्थायिनस्तिम्मयज्वा ।

सिद्धान्तस्यार्कनाम्नः कलितपदवतीं कामदोग्ध्रीं सुटीकां
मानाध्यायस्य सम्यक् रविगुरुकृपया प्रोक्तवानम्बिकायै ।।

इति श्रीसूर्यसिद्धान्ते प्रथमप्रश्ने मयप्रश्ने सव्याख्याने मानव्यवहारो नाम चतुर्दशोध्यायः ।

Post -Colophon :

श्रीकृष्णाय परमगुरवे नमः । श्री जानकीवल्लभाय नमः।

श्रीमन्नवग्रहदेवतायै नमः । श्रीसूर्यसिद्धान्तकामदोग्ध्रीव्याख्यानं संपूर्णम् ।।

हरिः ओम् । शुभमस्तु । श्रीशालिवाटीपुरस्थ-प्लवतटाकाख्य-ग्रामनिवासिनः हीरहरशास्त्रिणः स्वकीयमिदं पुस्तकम् । १०७५ जयसंवत्सरे मिथुनमासि षोडशदिने तेन मया लेखयितम् ।।

Serial No. 962

Sūryasiddhānta with com. Vivaraṇa by Bhūdharasūri

(MS. No. TR 491)

Beginning :

यस्योदये निखिलविश्वतमिस्रजाल-
विच्छेदनं भवति सङ्कुचितं यदस्ति ।
तं विश्ववन्द्यसुरवन्दितपादपद्मं
सव्येतराच्युतदृशं प्रणमामि सूर्यम् ।।
काम्पिल्ये सुरसिन्धुबन्धुरतले ज्योतिर्विदामग्रणी-
र्भारद्वाजकुलेऽमले भवति हि श्रीकेशवार्याह्वयः।
तत्पुत्रो नृपवृन्दवन्दितपदः श्रीदेवदत्ताभिधः
कीर्त्या निर्मलयोज्ज्वलस्समतनोर्यः पंक्तिसंख्यादिकः।

तत्र भवान् सूर्यांशुसंभूतः पुमान् श्रीदेवनमस्कार रूपं शिष्टाचार परिप्राप्तकर्तव्यताकं मङ्गलमाचरति ग्रन्थकारः -

Beginning of text :

अचिन्त्याव्यक्तरूपाय निर्गुणाय गूणात्मने ।
समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः ।।

End. Colophon to ch. I.

इति ज्योतिर्विद्भूधरकृते सूर्यसिद्धान्तविवरणे मध्यमाधिकारः प्रथमः। प्रथमाध्यायः समाप्तः ।

Colophon to XIV :

इति श्रीज्योतिर्विद्-देवदत्तात्मज-भूधरविरचिते सूर्यसिद्धान्तविवरणे मानाध्यायश्चतुर्दशः समाप्तः। समाप्तोऽयं ग्रन्थः ।

Post-col :

भागादिखचरस्त्रिघ्नः खयुगाद् भाजितो भवेत् ।
नक्षत्रात्मग्रहः स्याच्चेत् खयुगात् गुण्यते यदि ।
त्रिभिर्भक्तं तु तच्छेषं इति सिद्धान्तसंमतम् ।।
सूर्यसिद्धान्तविवरणं समाप्तम् ।

Serial No. 971

Svapnādyāya I by Bṛhaspati (MS. No. TR 470-e)

Preliminary:

श्रीपरमात्मने नमः ।

Beginning :

अथ बृहस्पतिप्रोक्तः स्वप्नाध्यायः प्रारभ्यते ।
स्वप्नाध्यायं प्रवक्ष्यामि नानास्वप्नसमुच्चये ।
स्वप्नस्तु प्रथमे यामे संवत्सरविपाकिनम् ।
द्वितीये चाष्टभिर्मासैः त्रिभिर्मासैस्त्रियामिकम् ।
चतुर्थे यामिके स्वप्ने मासैकेन फलं भवेत् ।।

End:

दुकूलमुक्तामणिभिर्नरेन्द्राः
सामन्तदैवज्ञपुराहिताश्च ।
तद्देवतागारमनुप्रविश्य
प्रवेशतस्तत्र दिगीश्वरं च ॥
अभ्यर्च्य मन्त्रैस्तु पुराहितस्तु
संयम्य तस्यां भुवि संयतात्मा ।
ब्राह्मीशपूर्वामथ भागपुष्पं
कृत्वोपवासं शिरसि क्षितीशः ॥
तथैकभुक् दक्षिणपार्श्वशायी
स्वप्नं परीक्षेत यथोपदेशम् ।
अथ शयनकालस्मरणीयमन्त्रक्रमः फलश्रुतिश्च -
नमश्शम्भो त्रिनेत्राय रुद्राय वरदाय च ।
वामनाय विरूपाय स्वप्नाधिपतये नमः ॥
भगवन् देवदेवेश शूलभृत् वृषवाहन ।
इष्टानिष्टे ममाचक्ष्व स्वप्ने सुप्तस्य सान्त्वतः ॥
एकवस्त्रः कुशास्तीर्णे सुप्तः प्रयतमानसः ।
निशान्ते पश्यति स्वप्नं शुभं वा यदि वाशुभम् ॥
एतत् पवित्रं .....पुण्यदं पापनाशनम् ।
यः प्रातरुत्थाय दुःस्वप्नं तस्य नश्यति ॥

End :

इति स्वप्नकाशिका समाप्ता ॥

Serial No. 977

Svapnādhyāya II. Anon. (MS. No. 75726-c)

Beginning :

स्वप्नफलम् -

ततः परं प्रवक्ष्यामि स्वप्ने दृष्टं फलाफलम् ।
आदित्यमण्डलं स्वप्ने चन्द्रं वा यदि सुप्रभम् ।।
पश्येत् रोगाद् विमुच्येत महतीं श्रियमाप्नुयात् ।
